इत्याद्यावतारे श्रीचतुर्विंशतिसाहस्रे एकोनविंशतिक्रमसूत्रम् ।

" " द्वादशोत्थितक्रमसूत्रम् ।

" " षोडशैकाक्रमपदं समाप्तम् । (?)

इत्याद्यावतारे महामन्यानभैरवयज्ञे श्रीचतुर्विंशतिसाहस्रे संहितायां महा .... पूजासूत्राधिकारो नामानन्दः । इत्यादयः ।

(घ) संहितापाठः ।

(शुक्लयजुर्वेदीय ।) अक्षर – नेवारी ।

प्रारम्भवाक्यम् । इषेत्वोर्जेत्वा वायवस्थ देवो वः सविता । इत्यादि ।

अन्तवाक्यम् । शाके संवत्सरे १३४० श्रीमन्नाग्रामपत्तन राजाधिराजपरमेश्वर श्रीश्रीजय अचामलुदेवस्य विजयराज्ये लिखितः श्रीधारानन्दे ।

८०१

(क) अमरकोषटीका ।

वृक्षव्यतिनाम टीका ।

(अध्ययनसंग्राहक ।) मैथिलाक्षरम् । १२ पत्राणि ।

(ख) अमरकोषटीका ।

ब्रह्मवर्गादि क्षत्रियवर्गपर्यन्ता । श्रीकरेण रचिता । १८१ – २१० पत्राणि ।

पुष्पिका । इति मिथिलामहीमहेन्द्रसमस्तप्रक्रियाविराजमानश्रीम ... हरलक्ष्म-प्रसादपुण्यावलोकमहाराजाधिराजश्रीमदर्जुनसंहसेनानां सत्य-महा-महोपाध्यायश्रीश्रीकरविरचितायाममरकोषविवरणटीकायां व्याख्यामृता-भिधानायां भूकाण्डे .. विवरणं समाप्तम् ।

अपराः पुष्पिकाः, – इति व्याख्यामृते ब्रह्मवर्गविवरणम् ।

,, ,, क्षत्रियवर्गविवरणम् ।

,, ,, वैश्यवर्गविवरणम् ।

(ग) अमरकोषः ।

अक्षर – नेवारी । (खण्डिताङ्गः ।)

८०३

(क) अमरकोषः ।

(ख) अमरकोषटीका ।

(खण्डिता ।) श्रीकरेण रायमुकुटेन च रचिता ।

८४५

(क) कूर्म्मपुराणम् ।

नागराक्षरलिखितम् । ५०० पत्राणि ।

पुष्पिका । इति कूर्म्मपुराणे षट्साहस्रिकायां संहितायामुपरिभागे चित्वारिंशो-ऽध्यायः । समाप्तमिदं कौर्म्मं पुराणम् । ॐ नमः ।

(ख) वृहन्नारदीयपुराणम् ।

मैथिलाक्षरलिखितम् । १०५ पत्राणि ।

पुष्पिका । इति वृहन्नारदीये त्रिंशत्तमोऽध्यायः । (ततः पत्रद्वयमस्ति ।)

(ग) विश्वनाथप्रकाशः ।

४४७ पत्राणि । मैथिलाक्षरम् ।

प्रारम्भवाक्यम् । .. ..

क्वाथः कृत पुष्कर-मातुलुङ्ग-पलाशपूतीकषठी + + + + ।
हनागराक्षिवचाकवानां
संस्कार-सख्या लवनस्य पेयः ॥

इत्यादि ।

अन्तवाक्यम् । स्वेदस्य रोमकूपेभ्यो यस्य रक्तं प्रवर्त्तते ।
पुरुषस्य विशार्त्तस्य सद्यो जह्यात् स जीवितम् ॥

इति विश्वनाथप्रकाशे निदानरसकर्म्मविपाकाख्ये अरिष्टकालज्ञानादि-निरूपणाध्यायः ॥ (अतःपरमपि सन्ति बहु पत्राणि तत्र पुष्पिकाभावा-दस्यैवाध्यायः शेषवाक्यत्वेन गृहीतः ।)

पुष्पिकाः,— इति ० सरोपत (?) हृद्रोगचिकित्साधिकारः समाप्तः ।
इति ० मूत्रकृच्छ्रचिकित्साधिकारः समाप्तः ।
इति ० मूत्राघातचिकित्साधिकारः समाप्तः ।
इति ० अश्मरीचिकित्साधिकारः समाप्तः ।
इति ० शोथचिकित्साधिकारः समाप्तः ।
इति ० अन्नद्रवाधिकारः समाप्तः ।
इति ० शब्दापत्री मकसवकाखायवद्राञ्जीचिकित्साधिकारः समाप्तः ।
इति ० बालरोगचिकित्साधिकारः समाप्तः ।

इति ० रसायनाधिकारः समाप्तः ।

इति ० हृद्रोगचिकित्साधिकारः समाप्तः । इत्यादयः ।

८६०

(क) भागवतम् ।

(सर्वाङ्गल-प्रथमस्कन्धात्-खण्डितदशमस्कन्धपर्यन्तम् ।)

५१८ पत्राणि । मैथिलाक्षरम् ।

८६७

महाभारतम् ।

(शान्तिपर्व्वमात्रम् ।) मैथिलाक्षरम् ।

पुष्पिका । लसं ४१५ कार्त्तिकशुक्ल[illegible] गुरौ दिने [illegible] परमभट्टारक-
मर्य्यादा[illegible] ( ) [illegible] . . , तिरभुक्ति-
मिदं मोक्षधर्मपुस्तकमिति । सम्वत् [illegible] [illegible]
तिथौ ० दिने महाराजाधिराज श्रीमज्जयप्रतापमल्लदेव [illegible]
धर्मपरायण . . . . . . कृतः । पञ्चदशदिनाभ्यन्तरे सम्पूर्णः कृतः ।

८६९

महाभारतम् ।

(उद्योगपर्व्वमात्रम् ।) मैथिलाक्षरम् । लसं ४२२ ।

८७२

शिवपुराणम् ।

(खण्डितम् ।) मैथिलाक्षरम् ।

९१०

(क) बृहन्नारदीयपुराणम् ।

मैथिलाक्षरम् । लसं ४२९ ।

(ख) हरिवंशम् ।

अक्षर — नेवारी । संवत् २५७ (प्रारम्भाङ्कानि ।

(ग) दानवाक्यावली ।

मैथिलाक्षरम् । लसं ५१२ ।

(घ) महालक्ष्मीव्रतमाहात्म्यव्याख्यानम् ।

(ङ) पौर्णमासीव्रतकथा ।

(च) विष्णुपुराणम् ।

(षष्ठ-अंशपर्य्यन्तम् ।)

(छ) विष्णुपुराणम् ।

प्रथमद्वितीयांशात्मकम् । (खण्डितम् ।)

८१३

(क) खण्डखाद्यटीका ।

६६ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः श्रीसूर्याय ।

खण्डखाद्यकस्य स्फुटपदी टीकां वक्ष्यामि । आदौ तावत्सर्व्वैः खमखल-युक्तसंवत्सरेण शककालः साधनीयः । पश्चात् यथोक्तं खण्डखाद्यकेन तथा क्रमः कर्त्तव्यः । नेपालमण्डले शककालसाधनं प्रवृश्यते । सूत्रमिदं,-

नेपालसंख्यं नयनाश्वनागा –

वर्षे क्षिपेदेव शकाब्दकाल इति ।

नयनाश्वनागाः ८७२ तेषु वर्त्तमानसंवत्सरं योजयेदयं – शककालो भवति । इत्यादि ।

(ख) विवाहकर्मसमुच्चयः ।

१० पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । लीलावलोकनपरस्परदृष्टिपाते-

र्यालिङ्गिताङ्गपुलकाञ्चितशङ्करस्य ।

देव्याः सदैव चरणौ प्रणिपत्य वक्ष्ये

स्त्रीणां विवाहसमयस्य विधिं यथार्थं ॥

अन्तवाक्यम् । इति विवाहकर्मसमुच्चयः समाप्तः । संवत् ८१६ (भाद्रपदकृष्णे १)

आश्विन शुक्लनवम्यां शुभदिने लिखितमिति ।

(ग) वराहमिहिरसंहिता ।

११७ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । नमः सूर्य्याय ।

अज्ञातमध्यान्तसमुद्भवाय
सर्व्वात्मने सर्व्वगताय चैव ।
प्रणम्य चैकाय सनातनाय
स्वर्गीकृतं येन जगत् समस्तम् ॥
प्रजापतिर्मन्मथ यत्र यस्मात्
कामं विना न प्रभवः प्रजानाम् ।
अष्टस्तु सृष्टीषु च नास्ति भेदः
सर्व्वात्मता सर्व्वगतः स यस्मात् ॥
तस्मात् परं नापरमस्ति किञ्चित्
सौन्दर्य्यमस्मादपरं च नान्यत् ।
तेनैकदर्शेन मनोभवेन
व्याप्तं जगत् .. मतेन सर्व्वम् ॥
अग्रामगामी भगवान् पतङ्गः
शोणीकृतस्त्राङ्गनुत शक्रः ।
चतुर्मुखो येन कृतश्च शम्भुः
स मन्मथो मङ्गलमादधातु ॥
अथ भगवानपि
(शार्ङ्ग) शार्ङ्गधरो भगवत ..
. . . . ।
कष्टोऽस्य भगा इति तेन कृतं
भगवानिति नाम जगत्प्रसिद्धम् ॥
सीतावियोगेन बहूनि दुःखा-
न्यासानि रामेण सलक्ष्मणेन ।
संस्मृत्य तानीह कलौ सदस्या-
व्याप्तौ . . . . . . विवाहितानि ॥
दुर्भगास्तनयवर्जिताश्च य-
न्निषेवन्ति वनिताः पतिव्रताः ।

ससतेव त्रिनिपातयन्ति ता-

अब्जजन्मप्रतिमैस्तु दुष्कृतैः ॥

सुरभिकुसुमगन्धैरर्चयित्वा जिनेन्द्रान्

शुभतिथिकरवारे वेदवित् संप्रतिष्ठा ।

उभयकुल . . . . सङ्घये

प्रथमवयसि दद्यात् कन्यकां यौवनस्थां ॥ इत्यादि ।

अन्तवाक्यम् । आर्य्यनारायणविरचितायां कृतौ संहितायां । ठिकाणिके (?) नाम वाजायां

समाप्तः । संवत् २६० (आकाराव्धनागानि) २ कार्त्तिक सुदि ।

८३४

भागवतदशमस्कन्धटीका ।

(भावार्थदीपिका) श्रीधरस्वामिना रचिता । १२० पत्राणि ।

मैथिलाक्षरम् ।

अन्तवाक्यम् । लसं ३७२ कार्त्तिक सुदि ३ रवौ दिने कोरैलीग्रामे धनिकश्रीनारा-

यणेन . . . . पाठार्थं लिखितमिदं पुस्तकम् ।

८७६

भागवतपुराणम् ।

२६० पत्राणि ।

अन्तवाक्यम् । समाप्तश्चायं द्वादशस्कन्धः ।

स राजते श्रीजयमासमल्लो

श्रीपद्मरामाद्भुवि तापकारी ।

अद्युम्नरीतो हृदि तापहारी

प्रभुर्नृ विजिता वरराज्यधारी ॥

तस्य विजयराज्ये ।

भावविदग्धतः श्रीमान् विष्णुर्विप्रो विराजते ।

वैष्णवानां हितकारः पण्डितानां दयाकरः ॥

तस्यादेशमासाद्य पुस्तं श्रीकृष्णचरितं शुभम् ।

हरिवंशेः प्रणीतोऽसौ वैष्णवगुणसम्भवाः ॥

(?) कौर्म्यिलेयाग्निजाघोऽब्दे (आग्नेऽब्दे) यामे माघे ऽसितेतरे ।
पञ्चम्यामर्कभर्त्तोऽङ्कि लिपिपूर्णं तदाभवत् ॥ (?)
श्रीभागवतं सम्पूर्णम् ।

१००१

(क) विष्णुपुराणम् ।
मैथिलमक्षरम् ।

(ख) महाभारतस्यादिविराटपर्व्वटीका ।
खण्डिता ।

(ग) हरिवंशटीका ।
खण्डिता । शाके १५३० ।

(घ) वृहन्नारदीयपुराणम् ।
मैथिलमक्षरम् । लसं ४२५ ।

(ङ) रामायणम् ।
(सुन्दरकाण्डः ।) मैथिलमक्षरम् । लसं ३१६ ।

(च) महाभारतम् ।
(शान्तिपर्व्वमात्रम् ।) खण्डितम् । मैथिलमक्षरम् ।

(छ) रामायणम् ।
(उत्तरकाण्डः ।) मैथिलमक्षरम् । लसं ३०४ ।

(ज) नारसिंहपुराणम् ।
१९२ पत्राणि । मैथिलमक्षरम् ।

अन्तवाक्यम् । लसं ३३९ । श्रावणशुदि षष्ठ्यां रविवासरे महाराजाधिराजश्रीमन्मदन-
सिंहदेवानां विजयिनां शासति गोरखपुरे सिपाहकटके सदुपाध्याय-
श्रीहरिनाथशर्म्मभिर्नारसिंहाख्यमदः पुराणमलेखि । श्रीगोपीजन-
वल्लभप्रसादादिति ।

१००२

(क) विष्णुधर्म्मः ।
अक्षर – नेवारी । संवत् १६० । (आसराशाक्रान्ति ।)

अन्तवाक्यम् । आश्विने कृष्णचतुर्थ्यां बुद्ध(बुध)दिने परमभट्टारकमहाराजाधिराजपर-
मेश्वरश्रीमद्भास्करदेवस्य राज्ये श्रीहरिसिंहपण्डितेन तावन्मे श्रीलक्ष्मीधर-
दर्शनस्य देयधर्म्मोऽयमस्य आर्यातिलक .. .. ॥

(ख) विष्णुधर्मः ।

अक्षर – नेवारी ।

अन्तवाक्यम् । इति विष्णुधर्म्मेषु शास्त्रमाहात्म्यं परमाष्टमं धर्म्मोत्तमं परिसमाप्तमिति ।

१००३

एकादशीव्रतमाहात्म्यम् ।

अक्षर – नेवारी ।

अन्तवाक्यम् । नेपालसंवत्सरे शरसप्ताक्षमूर्ते
वैशाखपक्षसितविश्वतिथौ च हस्ते ।
.. ..
.. .. ॥

१०७६

(क) न्यायरत्नाकरः ।

श्रीधर्म्मेण रचितः । मैथिलाक्षरम् ।

एकादश्यधिकरणम् ।

श्रीमुरारिमिश्रेण रचितम् । ९ पत्राणि । मैथिलाक्षरम् ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय । प्रयोजनाभिसन्धानत्वात् तावाप्युपयोजकं हस्तं
तन्मात्रायलक्षणं वर्णयिष्यामः ।

अन्तवाक्यम् । यथाप्रतिकारणं मेरेण्येन पञ्चोपकार इति ।

पुष्पिका । इति मिश्रमहामहोपाध्यायश्रीमुरारिकृतौ एकादश्याधिकरणं समाप्त-
मिति । महामहोपाध्यायश्रीरत्नाकरात्मजेन तामुदेवतानायनपदेन
श्रीहरिहरेण लिखितमिदं पुस्तकम् ।

(ख) रूपसाधनम् ।

सुभूतिचन्द्रेण रचितम् । विवरणं प्रस्तम् ।

(ग) रघुवंशटीका ।

शोभनाभिधा । सप्तसर्गपर्य्यन्ता । अक्षर – नेवारी ।

(घ) चान्द्रव्याकरणम् ।

खण्डितम् । अक्षर – नेवारी । संवत् ४४१ ।

(ङ) उष्मभेदः ।

अक्षर – नेवारी । संवत् ४४१ ।

(च) श्रुतबोधः ।

अक्षर – नेवारी । (खण्डितः ।)

(छ) दशकर्म्मपद्धतिः ।

३५ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्माय । (?) अथ गर्भाधानकर्म्म ।

अन्तवाक्यम् । विवाहचतुर्थीहोमः समाप्तः ।

संवत् ५८३ । श्रीश्रीमहाराजाधिराजपरमेश्वरपरमभट्टारकश्रीजयसिंह नाम .. .. ।

(ज) तात्पर्य्यपरिशुद्धिः ।

उदयनेन रचिता । ५७ पत्राणि । मैथिलाक्षरम् ।

अन्तवाक्यम् । इति श्रीमदुदयनकृतौ द्वितीयोऽध्यायः समाप्तः । लसं ३३९ । वसुकाग्रामे भाद्रशुदि षष्ठ्यां कुजे सदुपाध्यायश्रीलक्ष्मीपतीनामाज्ञया श्रीजटाधरेण लिखितमिदं पुस्तकमिति । शुभमस्तु ।

(झ) ताराहस्यवृत्तिका ।

शङ्करेण रचिता । मैथिलाक्षरम् । लसं ५११ ।

(ञ) प्रक्रियाकौमुदी ।

(द्विरुक्ति प्रक्रियापर्य्यन्ता ।) रामचन्द्रभट्टेन रचिता । लसं ५५८ ।

(ट) मेघदूतम् ।

१-८ श्लोका न सन्ति । अक्षर – नेवारी ।

अन्तवाक्यम् । श्रेयोऽस्तु संवत् ४८४ कार्त्तिकशुक्लपूर्णिमायां तिथौ । भरणिनक्षत्रम् व्यतीपातयोगे । सोमवारे । श्रीराजाधिराजपरमेश्वरः श्रीश्रीजयार्जुनदेवस्य विजयराज्ये .. .. .. । श्लोकसंख्या ११० ।

१०७७

(क) स्मृतिपरिभाषा ।

वर्द्धमानेन रचिता । मैथिलमक्षरम् ।

लसं ३८८ । श्रावण शुक्लैकादश्यां शुक्रे भाउर्गिग्रामे श्रीपद्माकरमाधव-
शर्म्मभ्यां लिखितमिदं पुस्तकमिति ।

(ख) दशक्रियाविधिः ।

खण्डितः । ३५ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्मणे नमः । अथ दशक्रियाविधिः । तत्रादौ विवाहः । चन्द्रताराऽनुकूले भद्रदिने कन्याभ्राता भ्रातृपुत्रो वा मातुलो वरस्य पदं गच्छेत् । ततो वरस्याचरितमधुपर्कस्य (मधुपर्कस्य) प्राङ्मुखोपविष्टस्याग्रतः कन्याभ्राता उत्तराभिमुखोपविष्टः तस्मिन् काले अग्निसान्निध्ये "भ्राता भ्रातेस्मरोमिथि प्रत्यङ्कं प्रपसिते भगिनी पिता तुभ्यं प्रदास्यति ।" इमं श्लोकं पठित्वा फलप्रोक्षणं वरस्य दद्यात् । इत्यादि ।

(ग) भागवतम् ।

दशमस्कन्धस्य कतिपयानि पत्राणि । वङ्गीयमक्षरम् ।

(घ) वामकेश्वरीस्तुतिन्यासपूजाविधयः ।

वत्सराजेन रचिताः । अक्षर – नेवारी ।

पुष्पिका ।

४ पत्रे । इति श्रीमहाराजाधिराजविद्याधरचक्रवर्तिवत्सराजविरचिता श्रीवामकेश्वरीस्तुतिः समाप्ता ।

८ पत्रे । इति न्यासविधिः । (पूजाविधिः खण्डितः ।)

(ङ) कार्त्तिकमाहात्म्यम् ।

(स्कन्दपुराणीयम् ।) वङ्गीयमक्षरम् ।

समाप्तवाक्यम् । लसं ४४७ । आश्विनवदि ५ चन्द्रवासरे.. ।

(च) हरितालिकाकथा ।

(भविष्योत्तरीया) वङ्गीयमक्षरम् ।

(छ) रसमञ्जरी ।

भानुदत्तेन रचिता । मैथिलमक्षरम् ।

अन्तवाक्यम् । पुराङ्कवेशाङ्कितलक्षणाङ्कं
मार्गे च जीवे च वलक्षपक्षे ।
अलेखि पुस्ती रसमञ्जरीयं
नूनं कवि-श्रीयदुनन्दनेन ॥

(ज) कीर्त्तिपताका ।

विद्यापतिना रचिता । (लेखयित्वा सङ्गृहीता ।)

(झ) देवीमाहात्म्यम् ।

अक्षर – नेवारी । संवत् २२९ । (आसगरण्यङ्कानि ।) कार्त्तिककृष्ण ।

(ञ) महाभारतम् ।

(स्वर्गारोहणपर्वमात्रम् ।) वङ्गाक्षरलिखितम् । सं ४३५ ।

(ट) संहितापाठः ।

अक्षर -- नेवारी । श्लोकास्तु —

× × × × × × ।

ध्रुवासि ध्रुवोऽयमयोमास्मिन्नायतने ॥ २८ (?)॥

ऐङ्कारिमध्वरस्य प्रचलमं सयन्तशुं आपया मदः ।

रातिं वातस्य सुभगां महोमुपदधामि . . . . ॥ (१) ११९ ॥

इत्यादयः ।

(ठ) सरोजकलिका ।

वङ्गाक्षरलिखिता ।

प्रारम्भवाक्यम् । ॐ नमस्तस्मै ।

भास्वता कविरत्नेन प्रयत्नेन स्फुटीकृता ।

सरोजकलिका भाति श्रुतिस्त्रीकर्णभूषणम् ॥

अथ श्राद्धकर्मव्यवस्था । इत्यादि ।

(ग्रन्थं खण्डितम् ।)

(ड) प्रबोधचन्द्रोदयटीका ।

रुचिकृता । विवरणं प्रशस्तम् ।

(ढ) तटाकविधिः ।

(वाजसनेयः ।) अक्षर – नेवारी । संवत् ८४४ ।

. . . . श्रीराजराजेश्वर-श्रीश्रीजयज्योतिर्मल्लदेवस्य विजयराज्ये ।

१०७८

(क) स्तोत्रसंग्रहः ।

(ख) भैरवानन्दनाटकम् ।

विवरणं प्रदत्तम् ।

(ग) देवाम्तपञ्चराचम् ।

विवरणं प्रदत्तम् ।

(घ) कुब्जिकामतम् ।

विवरणं प्रदत्तम् ।

(ङ) भोजदेवसंग्रहः ।

(खण्डितः ।) विवरणं प्रदत्तम् ।

(च) धातुपाठः ।

१०७९

(क) भागवतद्शमस्कन्धः ।

अक्षर – नेवारी ।

(ख) रामायणम् ।

(३-८०६ पत्राणि ।) अक्षर – नेवारी ।

खण्डितादिकाण्डात् खण्डितोत्तरकाण्डपर्यन्तम् ।

११११

(क) मिथ्यायोगावली ।

अक्षर – नेवारी । ११ पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमो बुद्धाय ।

अन्तर्निर्भिन्नमिव परस्य जगतीजिष्णुमत्सर्य तमो

यस्याहेतवोऽक्षयमपि परिज्ञानानुबोधप्रियाम् ।

'यत् कायापरीक्षतार्हृदय+स्थितं वजिय-

कोदैतविरिताङ्कुतानि विजयी-भावानि भावनु वः ॥ १

यत्राज्ञावलीमविहतमथ कलेषु
द्राग् यत्र भवाम्बुनिधमुखैः ।
तत्स्वदुग्धावचनिर्मितो यै-
रमोघ .. श्रियमादधातु ॥

इह हि मृदुमध्यक्रमाभ्यां सुभावितसमाधेरधिमात्रप्रज्ञस्य भगवतः सर्वाकारवरोपेतः स्फुरत् .. .. .. कारकः झटिति ज्ञानजिघ्नो योगी .... निष्पन्न उच्यते । इत्यादि ।

अन्तभागम् । समाप्तेयं निष्पन्नयोगावली । कृतिरियं महापण्डिताभयाकरगुप्तपादानामिति । संवत् ६८४ भाद्र शुदि नवम्यां तिथौ सोमवासरे लेखनं सम्पूर्णमिति । लिकोष्णुतृ-उपाध्यायाचार्य-श्रीरविचन्द्रस्य पुस्तकोऽयम् । स्वार्थेन लिखितमिदम् । शुभमस्तु ।

(ख) योगरत्नसंग्रहः ।

मैथिलाक्षरम् । २४० पत्राणि ।

पुष्पिका । इति श्रीमद्वैद्यश्रीगुरुपालमहत्तरविरचितो योगरत्नसङ्ग्रहः समाप्तः ।
रसवसुगणचन्द्रैरङ्कते श्रीशकाब्दे
तपसि विमलपक्षे भूमिजे पूर्णिमायाम् ।
व्यलिखदिह समस्तं पुस्तमेतत् प्रयत्ना-
न्निखिलगुणकदम्बं विष्णु .... प्रसूतः ॥ ॐ नमः ।
श्रीरस्तु । शुभमस्तु । ततो नागराक्षरेण ——
"श्रीश्रीसुमतिजयजितामित्रमल्लदेवस्य पुस्तकमेतद्गिरामणगानप-
वंशज (?) संवत् ८१० कार्त्तिक शुदि ९ ॥" एतावल्लिखितमस्ति ।

(ग) द्रव्यकिरणावली ।

उदयनकृता । अक्षर – नेवारी ।

(घ) गणयागविधिः (?)

अक्षर – नेवारी । (खण्डितः ।)

(ङ) खण्डनखण्डखाद्यम् ।

श्रीहर्षकृतम् । मैथिलाक्षरम् । १०९ – २१२ पत्राणि ।

विजयपुरे पण्डित-श्रीवासुदेवेन लिखितं पुस्तकमिदं गतकण्डायनेन-

वैद्यैव-श्रीढ्योरत्नमसमाप्तं मार्गकृष्णत्रयोदश्यामिति।

... ...॥

सवं ११६ मार्गवदि १३ शुभमस्तु।

(ख) पञ्चरक्षा।

अक्षर - नेवारी।

अन्त्यावाक्यम्। आर्य्यमहाप्रत्यङ्गिरा, आर्य्यमहामायूरी, आर्य्यमहाशीतवती, आर्य्यमहामन्त्रानुसारिणी, आर्य्यमहाप्रतिसरा, एतानि पञ्चरक्षासूत्राणि। परिसमाप्ता चेति।

राजाधिराजपरमेश्वरपरमभट्टारक-श्रीश्रीजयजक्षमल्लदेवस्य विजयराज्ये।

प्रशस्त। संवत् ५९० । श्रावणशुक्लप्रतिपद्यां तिथौ मघानक्षत्र परिघयोगे कर्कटराशिं गते सवितरि सिंहराशिं गते चन्द्रमसि॥

१११४

(क) सिद्धिसारसंहिता।

दुर्गागुप्तपुत्रविष्णुगुप्तकृता। अक्षर – नेवारी। ६५ पत्राणि।

संवत् मिन-भाद्र ध × × शु × एकादश्यां प द्वादश्यां तिथौ। (?) श्रीहु प मूलनक्षत्र। गुरुवासरे श्रीमत्-श्रीश्रीराजाधिराज-श्रीश्री × × × × मल्लदेवस्य विजयराज्ये।

श्रीललितपत्तना श्रीमनोमल्लगः पण्डितस्य-श्रीवृद्धनागवैद्य (?) श्रीजय- × × केयम्। इदं वैद्यशास्त्रं सिद्धिसारनिघण्टकसमेतं लिखितमिति।

(ख) महादाननिर्णयः।

वाचस्पतिमिश्रकृतः। देवीदासमध्यस्य। सवं ६९२। वैशाखवदि १२ चन्द्रे च दिने समाप्त।

(ग) हरिमेखला।

अक्षर – नेवारी।

अन्त्यवाक्यम्। ॐ श्रीहरिमेखला नेपालभाषा नपिकायां पेयं प्राठिपिनि सम्पूर्णतरो। संवत् ५४१ माघकृष्णतृतीयायां तिथौ हस्तानक्षत्रे शुभयोगे बृहस्पति-वासरे सम्पूर्णमिति शुभमस्तु।

श्रीश्रीराजाधिराज-परमेश्वर-परमभट्टारक-श्रीश्रीजयज्योतिर्मल्लदेवप्रभु-

– – – सिद्धिरस्तु सर्व्वदा ।

(घ) तत्त्वचिन्तामण्यालोकटीका ।

(प्रत्यक्षखण्डस्य ।)

प्रारम्भवाक्यम् । ॐ नमस्तस्मै ।

कृष्णोत्सङ्गपदाङ्कितान्तराल

मुक्तानामभ्रमित × × × × × × ।

इत्थं स्फुटाभासि × × × नूतन ×

× × स्तनोतु × × सौख्यं शिवं शिवायाः ॥

प्रारिप्सितप्रतिबन्धकविघ्नविघातार्थं कृतं नमस्कारं . . . . . .

गृणाति । सत्त्वरजस्तमोलक्षणगुणातीत इत्यर्थः । ... .. त्रिगुणात्मचिन्त्यः

सानन्दः ... ... मित्यर्थः । अकारोकारमकाररूपत्र्यक्षरात्मकः ॐ आ-

त्मा इत्यर्थः । इत्यादि ।

(ङ) सारोत्तरनिर्घण्टः ।

(मध्येन खण्डितः ।) वैद्यकशास्त्रम् । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो बुद्धाय ।

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारकम् ।

स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम् ॥

नानामुनीनां वचना . . . . मतः सद्भिषजां नियोगात् ।

सोपद्रवा . . निदानलिङ्गा निरूप्यते रोगविनिश्चयाय ॥ (?)

नानातन्त्रविहीनानां . . . . मल्पमेधसाम् ।

सुखं विज्ञातु . . . . ॥ इत्यादि ।

अन्तवाक्यम् । इति सारोत्तरं नाम निर्घण्टः समाप्तः ।

अस्य ग्रन्थस्य प्रमाणश्लोकाः ११९ । (अक्षराण्यङ्कानि ।) कृतिरान्नार्णवस्य

. . . . लेखति वर्षशतद्वयं यातेन . . . . . . ।

(च) षट्कारकम् ।

मैथिलाक्षरम् । लसं ४०१ ज्येष्ठ शुदि । भौआड़ग्रामे श्रीमुरारिशर्म्मणा

लिखिता पुस्तकेति ।

(छ) कालोत्तरतन्त्रम् ।

(आदिखण्डितम् ।) अक्षर – नेवारी ।

इति कालोत्तरे षट्पञ्चाशतिके प्रथमः पटलः समाप्तः ।

११५१

(क) आख्यातकोषः ।

अक्षर – नेवारी । २३ पत्राणि ।

(ख) कादिमतम् ।

(षाड्शनित्यानन्दौघम् ।) ५ – १६४ पत्राणि । मैथिलाक्षरम् ।

(ग) प्रश्नोत्तररत्नमालिका ।

अक्षर – नेवारी । १४ पत्राणि ।

(घ) चौरपञ्चाशिका ।

अक्षर – नेवारी ।

(ङ) सुवन्तरत्नाकरः । (?)

मैथिलाक्षरम् ।

प्रारम्भवाक्यम् । ॐ नमो गणेशाय ।

नमः सरस्वतीपादपङ्कजाय हितैषिणे ।

यत्प्रसादाज्जगत् सर्व्वमु × × सुपजायते ॥

यदिशब्दा नियतान्ते पुंसि सन्ति स्त्रियामपि ।

गुणद्रव्यक्रियायोगात्त्रिलिङ्गाश्च तदनन्तरम् ॥

विसर्गान्तर्गतम्परम्य + कोष्ठप्रतिमु . . . . ।

प्रभवा ये गोत्राद्या पुंस्यन्ताः प्रकीर्तिताः ॥ इत्यादि ।

११६५

(क) सूर्य्यसिद्धान्तभाष्यम् ।

मैथिलाक्षरम् । मैथिलवाजपेय-चण्डेश्वराचार्य्यकृतम् ।

११७१

(क) दशकर्म्म ।

अक्षर - नेवारी ।

(ख) भगवद्गीता ।

अक्षर – नेवारी ।

(ग) **पूजाविधिः ।**

अक्षर – नेवारी ।

(घ) **स्तवराजः ।**

अक्षर – नेवारी ।

(ङ) **मयूरचित्रम् ।**

अन्त्यवाक्यम् । स्वस्ति श्रीराजाधिराज-श्रीश्रीजयस्थितिराजमल्लदेवस्य विजयराज्ये लिखितमिदं पुस्तकम् । तस्मिन् समये श्रीजयार्जुननामा राजा त्रिपुरराजसचिवेन प.... महाभक्त्या प्रतिष्ठति ।

(च) **स्तवराजः ।**

(छ) **विवाहपद्धतिः ।**

(कतिचित्पत्राणि ।) अक्षर - नेवारी ।

११७९

(क) **मयूरचित्रम् ।**

अक्षर - नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः सर्वज्ञाय ।

गर्गं मुनिवरश्रेष्ठं ज्योतिषज्ञानपारगम् ।

अभिवाद्याञ्जलिं कृत्वा भागुरिः परिपृच्छति ॥

भगवन् श्रोतुमिच्छामि दिव्यचक्षुमहातपम् ।

... ... मुत्तमज्ञानं ज्योतिषज्ञानपारग ॥

इत्यादि ।

पुष्पिकाः,— इति मयूरचित्रे प्रथमोऽध्यायः समाप्तः ।

इति मयूरचित्रे तृतीयोऽध्यायः ।

इति मयूरचित्रे पञ्चमोऽध्यायः ।

इति मयूरचित्रे उत्पातलक्षणे षष्ठोऽध्यायः ।

इति मयूरचित्रे सौम्योपेतलक्षणे (?) सप्तमोऽध्यायः ।

इति मयूरचित्रे अष्टमोऽध्यायः ।

(ख) **भगवद्गीता ।**

कतिपयानि पत्राणि ।

११८०

(क) यवनजातकम् ।

४ पत्रे,—इति यवनजातके मित्रामित्रविधिः ।
७ ,, ,, ग्रहस्वरूपः प्रथमः ।
९ ,, ,, होरास्वरूपः द्वितीयः ।
११ ,, ,, द्रेक्काणस्वरूपस्तृतीयः ।
१३ ,, ,, ग्रह ... ... विधिः ।
१५ ,, ,, आधानविधिः ।
१६ ,, ,, सूतिकाविधिः, मूलत्रिकोणविधिश्च ।
,, ,, ,, मित्रक्षेत्रविधिः, नीचक्षेत्रविधिश्च ।
१८ ,, ,, राजजन्म ।
,, ,, ,, चौरजन्माध्यायः ।
२० ,, ,, चन्द्रयोगविधिः ।
,, ,, ,, सूर्य्ययोगविधिः ।
२५ ,, ,, सूर्य्यराशिफलम् ।
२३ ,, ,, बुधराशिफलम् ।
२८ ,, ,, शुक्रराशिफलम् ।
३० ,, ,, चन्द्रराशिफलम् ।
,, ,, ,, मेषलग्नफलम् ।
३१ ,, ,, वृषलग्नफलम् ।
(एवं कर्कट, सिंह, कन्या, तुला, वृश्चिक,
धनुः, मकर, कुम्भ, मीन,—लग्नानां फलानि ।
३३ ,, ,, लग्नफलं समाप्तम् ।
३४ ,, ,, लग्नमतग्रहवृद्धिः ।
३५ ,, ,, द्विग्रहयोगः ।
३६ ,, ,, प्रव्रज्यायोगः ।
३९ ,, ,, स ... ... भावफलम् ।

५१ पत्रे इति यवनजातके नवांशफलम् ।

५२ ,, ,, चन्द्रांशतुल्यफलम् ।

५७ ,, ,, अरिष्टयागः । आयुर्दायश्च ।

६० ,, ,, दशापाकफलम् ।

६२ ,, ,, निर्य्याणशान्ति समाप्ता ।

७२ ,, ,, अर्यत्रिंशच्छतद्व्याधिकसहस्रद्वय-अङ्कानि ।
 ५२३३ ।

७३ ,, ,, प्रश्नजातकः समाप्तः ।

७४ ,, ,, कलत्रयोगः ।

७५ ,, ,, गर्भोऽध्यायः ।

७६ ,, ,, यात्रादिप्रश्नयोगः ।

८३ ,, ,, शकुनध्याय - - - दिग्शुद्धिः ।

८९ ,, ,, यवनाङ्क तुल्यफलम् ।

९२ ,, ,, स्वप्नोत्पत्तिः समाप्तः ।

९४ ,, ,, यात्रासन्दर्शनविधिः ।

१०७ ,, ,, यवनजातके - - - परिसमाप्तः ।
 उपेन्द्रवज्रावृत्त ... ... ।

११८६

नरपतिजयचर्य्याटीका ।

जगज्ज्योतिर्मल्लेन रचिता । शाके १५३९ ।

१२०६

(क) होराशास्त्रम् ।

३० पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः सूर्याय ।

मूर्त्तित्वे परिकल्पितः शशिभृतो – – पुनर्जन्मना-(?)

आत्मेत्यात्मविदां क्रतुश्च यजतां भर्त्तामरज्योतिषाम् ।

लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतो

वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः ॥

भूयोभिः पटुबुद्धिभिः पटुधिया होराफलं ज्ञप्तये
शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि ।
होरातन्त्रमहार्णवं प्रतरणे भग्नोद्यमानामहं
स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे ॥ इत्यादि ।

अन्त्यं खण्डितम् ।

पुष्पिका ;– होराशास्त्रे राशिभेदाध्यायः
,, राशियोनिभेदः ।
,, वियोनिजन्मकम् । (?)
,, आयुर्दायाध्यायः
,, अष्टवर्गाध्यायः ।
,, कर्मयोगाध्यायः ।
,, राजयोगाध्यायः ।
,, संख्यायोगाध्यायः ।
,, चन्द्रयोगाध्यायः ।
,, प्रव्रज्यायोगाध्यायः ।

(ख) भोजदेवसंग्रहः ।

(खण्डितान्तः ।) अक्षर – नेवारी ।

(ग) वैदिकमन्त्रसंग्रहः ।

(ऋग्वेदीयः ।) १६ पत्राणि । अक्षर – नेवारी ।

प्रारम्भभागः । ॐ नमो ब्रह्मणे नमः ।
अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ इत्यादि ।

(घ) पुरुषसूक्तम् ।

(खण्डितान्तम् ।) अक्षर – नेवारी ।

संवत् ८८४ चैत्र – – – (

(ङ) वैदिकमन्त्रसंग्रहः ।

(यजुर्वेदीयः ।) अक्षर – नेवारी ।

श्लोकश्च ; –

इयंसोर्डैत्या वादवस्य दैवो यः रचिता । इत्यादि ।

१९३० ।

(च) मानवन्यायशास्त्रम् ।

(नेवारी भाषायाम् ।) ११ – १४३ पत्राणि । अक्षर - नेवारी ।

शान्तिवाक्यम् । तस्मायप्रकरणं समाप्तम् ।

इदमल्पधियां नृणां बुद्धिरोधं परार्थितम् ।

नारदीयं यत् . . न्यायशास्त्रं महार्थवत् ॥

तस्मायं लिखति टीका स्वयं नेपालभाषया ।

इमां विज्ञाय भूपाद्याश्चरन्तु न्यायवर्त्मना ॥

इति मानव न्यायशास्त्रे नारदप्रोक्तायां संहितायां न्यायधर्मोपदानि समाप्तानि ॥

नेपाले स्थितिराजमल्लनृपतिर्भूपालचूडामणि-

स्तस्यामात्यवरोऽर्थिकल्पविटपी मन्त्रीश्वरो निधिः ।

तस्यार्थं मणिकाभिधेन कृतिना नेपालवाचा कृता

टीका न्यायविकाशिनी सुविदिता ब्रह्मोक्तधर्मस्मृतेः ॥

श्रीमांश्चन्द्रनरेन्द्रसूनुरमलप्रज्ञाप्रभावस्फुर-

त्कीर्तिस्फूर्जितनाकनायकगुरुर्मन्त्रीन्द्रचूडामणिः ।

जीयात् सर्वगुणाश्रयोऽमलयशा सत्प्रभाभास्वरो

मन्त्री श्रीजयतः कृपार्द्रहृदयः सर्वार्थिकल्पद्रुमः ॥

श्रीनेपालिकवत्सरे खखशरे पक्षे सिते फाल्गुने

मासे वाग्नितिथौ ...... भक्तापुरीपत्तने ।

राज्ये श्रीस्थितिराजमल्लनृपते राजाधिराजाधिपतेः

श्रीमन्न्यायविकाशिनी सुविदिता सम्पूर्तिमागादियम् ॥

लिखिता लूम(लुन्द)भट्टेन वज्राचार्येण धीमता ।

मन्त्रीन्द्रजयतस्यार्थे सद्धेयं न्यायटिप्पनी ॥

स्वस्ति श्रीनेपालिकसंवत्सरे ५०० फाल्गुनशुक्लतृतीयायां शुक्रवासरे

श्रीश्रीजयस्थितिराजमल्लदेवस्य विजयराज्ये भक्तपुरे अमात्यजयतदेवे : :

पुस्तकमिदमलेखि श्रीकीर्तिपुण्यमहाविहाराधिवासिना शाक्यभिक्षु-वज्राचार्य-श्रीलक्ष्मीमुनि(न्द्र)भद्रेणेति । शुभमस्तु सर्व्वजगताम् ।
श्रीरामनाथ जयतो रिपुमनिकामकामप्रौढाम्बुदप्रसरविस्फुरणैकवायुः ।
धाम्नाभिकाशर्का निपालनशाधुसूनुः पायात् प्रजा निजसुतानिव सर्व्वदैव ॥

(क) मैथिलब्राह्मणानां कुलपञ्जी ।

(खण्डिता ।) मैथिलाक्षरलिखिता ।

(ख) एकादशीव्रतमाहात्म्यम् ।

अक्षर नेवारी । ६३ पत्राणि ।

संवत् ८०० फाल्गुन-कृष्ण-एकादश्यां तिथौ सोमवासरे ।

... श्रीपशुपतिस्थाने श्रीआनन्दमल्लदेवस्य राज्ये लिखित ... ।

(ग) सौरसंहिता ।

आरम्भवाक्यम् । ॐ नमः शिवाय ।

कार्त्तिकेय उवाच ।

भगवन् देवदेवेश अनादिपरमेश्वर ।
समाख्यातं त्वया सर्व्वं वाङ्मयं सचराचरम् ॥
आदित्यस्य सुरेशान संशयोऽद्यापि मे महान् ।
आदौ तस्य नमस्कार ...... सचराचरम् ॥
क एष देव आदित्यः कुतो जातः किमुच्यते ।
कथयस्व यथान्यायं मामसं मे महेश्वर ॥ इत्यादि ।

अन्त्यवाक्यम् । सौरसंहितायां प्रयोजन ...... दशमः पटलः समाप्तः ।

अस्य ग्रन्थप्रमाणस्य निपुणं परिपिण्डितम् ।
षष्ठशतिकसंख्या ? सौरतन्त्रमिदं शुभम् ॥

इति । संवत् ६१ अश्विनि(आश्विन) कृष्णदिवाग्रयोदश्यां श्रीनीलीशालायां निवासिना ... ... ।

अतःपरं द्वे पत्रे गुप्ताक्षरलिखिते स्तः तत्र तन्त्रोक्तानि कानिचि-न्मन्त्राणि सन्ति ।

(घ) नारदीय-धर्मशास्त्रम् ।

अक्षर – नेवारी ।

(ट) विवादचन्द्रः ।

मिसरूमिश्रेण रचितः । मैथिलाक्षरलिखितः । लसं ४८१ ।

१२६१ ।

(क) प्रतिष्ठातन्त्रम् ।

जीर्णम् । खण्डितम् । अक्षर – नेवारी ।

(ख) तत्त्वचिन्तामणिः ।

(अनुमानखण्डः), गङ्गेशेन रचितः । मैथिलाक्षरलिखितः । लसं ४३९ ।

(ग) कर्पूरमञ्जरीनाटिका ।

मैथिलाक्षरलिखिता । लसं ३५८ ।

(घ) वाग्मतीमाहात्म्यप्रशंसा ।

खण्डितः । अक्षर – नेवारी ।

पुष्पिका । वाग्मतीमाहात्म्यप्रशंसायां तीर्थवर्णनं प्रश्न + नवसिद्धिनाम प्रथमः ।

(ङ) तात्पर्यपरिशुद्धिः ।

उदयनेन रचिता । मैथिलाक्षरलिखिता ।

१३०० ।

(क) नित्याह्निकतिलकम् ।

अक्षर – नेवारी । संवत् ३१७ ।

(ख) दानवाक्यावली ।

विद्यापतिना रचिता । २९ पत्राणि । लसं ३९५ ।

(मङ्गलाचरणादिकं किमपि नास्ति ।)

(ग) श्रीदत्तपद्धतिः ।

लसं २९९ ।

(घ) कात्यायनश्राद्धविधिः ।

१२ पत्राणि । अक्षर – नेवारी ।

(ङ) सन्ध्याविधिः ।

अक्षर – नेवारी । संवत् ४०१ चैत्रकृष्णपञ्चम्याम् ।

(च) मत्स्यावतारस्तोत्रम् ।

संवत् ८०३ । आषाढकृष्णत्रयोदश्यां .. राजाधिराज......

अनन्तमल्लदेवस्य विजयराज्ये ।

(छ) कौमारीपूजा ।

संवत ८०८ । ज्येष्ठ-अमावास्या......

राजाधिराज ... अनन्तमल्लदेवस्य विजयराज्ये ।

(ज) अनन्तव्रतविधिः ।

संवत ८०५ । आश्विन... राजाधिराज....अनन्त

मल्लदेवस्य विजयराज्ये ।

(झ) महालक्ष्मीव्रतम् ।

(ञ) महालक्ष्मीव्रतम् । वा लक्ष्मीचरित्रम् ।

रामकविराजेन रचितम् ।

अन्तवाक्यम् : श्रीरामनामकविराजकृतं पवित्रं

लक्ष्मीचरित्रमतुलं नतराजराजम् ।

कुर्वन्ति धीधनमनाः सुखिनो भवन्तु (?)

.. .. कमलाप्रसादात् ॥

इति महालक्ष्मीव्रते .. महापण्डित-श्रीश्रीरामविरचिते पञ्चमोऽध्यायः

समाप्तः ॥

संवत् ३९९ । फाल्गुन .. .. .. ।

.. .. राजाधिराज .. .. .. श्रीअनन्तमल्लदेवस्य विजयराज्ये ।

(ट) विष्णुपञ्जरस्तोत्रम् ।

संवत् ८०७ ।

(ठ) अनेकश्वरस्तवः ।

(स्कन्दपुराणीया ।) अक्षर – नेवारी ।

(ड) नीलकण्ठस्तवः ।

संवत् ८०७ ।

(ढ) वाजसनेयिनामहोरात्राश्रितधर्मनिबन्धः । (?)

(स्मृतिशास्त्रम् ।)

प्रारम्भवाक्यम् । .. शान्ततोरणयष्टीषु (?) विबुधानन्ददायिने ।
हरिरब्धिसुताबाहुमालयोर्नौ (यो)पुनातु वः ॥
अहोरात्राश्रितो धर्मो इह वाजसनेयिनाम् ।
निबध्यते नित्य — — — — भि ॥
तत्र मनुः । ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥ इत्यादि ।

अन्त्यं खण्डितम् ।

(ण) नित्याह्निकतिलकम् ।

संवत् ४२३ ।

(त) पुरुषपरीक्षा ।

विद्यापतिरचिता । ५०६ पत्राणि । लसं ५४२ ।

(थ) माधवानलकथा ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।
प्रणम्य परया भक्त्या देवतानां सरस्वतीम् ।
तस्याः प्रसादमासाद्य करिष्यामि कथामिमाम् ॥
अस्ति ... पुष्पवती नाम नगरी । ... तत्र नगरे राजा गोविन्दचन्द्रो-
नाम तस्य राज्ञीनां सप्तशतानि तासां मध्ये पट्टराज्ञी महादेवी पद्मिनी-
जातिः पद्मावती नाम .. .. .. तस्य राज्ञो पुत्रो माधवानलनामा
विप्रोऽस्ति । इत्यादि ।

अन्तवाक्यम् । इति माधवानलकथा समाप्ता । लसं ५४२ ।

(द) महालक्ष्मीमतभट्टारकः ।

विवरणं प्रश्नम् ।

१९२१

(क) तात्पर्यपरिशुद्धिः ।

२४ पत्राणि । मैथिलाक्षरलिखिता ।

प्रारम्भवाक्यम् । ॐ नमो गणेशाय ।

रागानुगतधर्मकरौ चन्द्रसूर्य्यावलेपनौ ।

नमामि गिरिजेशानौ यामिनीवासराविव ॥ इत्यादि ।

पुष्पिका । उत्पलाचार्य्यश्रीमच्छ्यनकृतौ तात्पर्य्यपरिशुद्धौ पञ्चमोऽध्यायः । सवं १०३

वैशाख १ सन्ध्या ? दिने भट्टाचार्य्यश्रीवाणीनाथस्याज्ञया – –

श्रीधर्म्मनिधिशर्म्मणा लिखितमिदं पुस्तकम् ।

(ग) दानधर्मः ।

(महाभारतशान्तिपर्व्वीयः ।) अक्षर – नेवारी ।

पुष्पिका । महाभारते शतसाहस्र्यां संहितायां दानधर्म्मेषु वैशम्पायनश्रेष्ठे पञ्च-

दशोऽध्यायः परिसमाप्तः । संवत् १६९ । (ताडपत्राणि ।)

१११०

(क) भारमङ्गलः ।

(धर्मशास्त्रम् ।)

पुष्पिका । इति सर्ववैश्वार्थसिद्धान्तरत्ने भारमङ्गले सप्तदोषविधौ नवमः परिच्छेदः

परिसमाप्तः । शुभमस्तु । संवत् ३७५ ।

(ख) न्यायवार्त्तिकतात्पर्यटीका ।

(पञ्चमाध्यायः ।) वाचस्पतिमिश्रेण रचिता ।

१२६१ ।

(क) दग्धक्रियाविधिः ।

(कर्मकाण्डः ।) अक्षर – नेवारी ।

(ख) स्तवराजमाहात्म्यम् ।

(भविष्यपुराणोक्तम् ।) अक्षर – नेवारी ।

(ग) मणेश्वरस्तवः ।

(स्कन्दपुराणीयः ।) अक्षर – नेवारी ।

संवत् (४९३) रामकल्पयुगे फाल्गुनकृष्णतृतीयायां तिथौ शतभिषानक्षत्रे

. . . . . . वेदज्ञा ब्रह्म(त्स)राजेन लिखितम् ।

(घ) नयतत्त्वालोकः।

(तृतीयाध्यायात् खण्डितसप्तमाध्यायपर्यन्तः।)

वाचस्पतिमिश्ररचितः। मैथिलाक्षरलिखितः।

पुष्पिका। इति महामहोपाध्यायमिश्रश्रीवाचस्पतिविरचिते नयतत्त्वालोके तृतीया-
ध्यायः समाप्तः। लसं ४८९। आश्विने काकोग्रामे।

(ङ) न्यायवार्त्तिकतात्पर्यटीका।

(द्वितीयाध्यायपर्यन्ता।) उदयनरचिता। शकाब्दाः १४१०। ... ...।
सर्पग्रामे महामहोपाध्यायसन्मिश्रश्रीमच्छङ्करात्मजेन श्रीपाक्षा गौहोरा-
म्बुप्र-प्राप्तसुतसुदेवेन – – – –।

(च) कर्म्मक्रियाकाण्डः।

सोमशम्भुरचितः। विवरणं प्रदत्तम्।

(छ) विवादरत्नाकरः।

(खण्डितः।) मैथिलाक्षरलिखितः।

(ज) अमृतेश्वरदेवस्य नित्यपूजाविधिः।

अक्षर – नेवारी। ११ पत्राणि।

प्रारम्भवाक्यम्। ॐ नमः शिवाय।

सन्ध्यापयस्यमुभयोर्ध्वदिन्दुबिम्बं
कुम्भस्य भूरिसुधयाप्लवमुभ्वरोभिः।
अङ्के प्रियाख्य वरदाभयपाणिरेष
मृत्युञ्जयो जयति साक्षनिशाकरो ५॥
– – – – यस्यैव येन सिद्ध्यति मन्त्रराट्।
आदौ स्नानं प्रकुर्व्वीत सर्व्वकिल्बिषनाशनम्।
अस्त्रमन्त्रेण देवेशि मृदमुद्धृत्य मन्त्रवित्॥ इत्यादि।

समाप्तिवाक्यम्। इत्यमृतेश्वरदेवस्य नित्यपूजाविधिः।

(झ) वामकेश्वरीपूजापद्धतिः।

१० पत्राणि। अक्षर – नेवारी।

(ञ) गुरुपंक्तिपूजाविधिः ।

१ पत्राणि । अक्षर – नेवारी ।

(ट) पुरश्चरणचन्द्रिका ।

(खण्डिता ।) देवेन्द्राश्रमरचिता । ८३ पत्राणि । वङ्गाक्षरलिखिता ।

पुष्पिका । इति परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वराश्रमपूज्यपाद-शिष्य-देवेन्द्रा-
श्रमविरचितायां पुरश्चरणचन्द्रिकायां कुण्डमण्डपविधानम् ।

(ठ) किरणावलीटीका ।

वङ्गाक्षरलिखिता ।

प्रारम्भवाक्यम् । ॐ नमो भगवते गोपालाय ।

विद्यामन्थाद्रयोद्भ्राजद्विद्यारत्नौघदायिने ।
यदुद्देशि नगाश्लेषे कर्णोऽपि विगतत्विषे ॥
यतो द्रव्यं गुणाः कर्म तथा जातिः परापरा ।
विशेषाः समवायो वा तमीश्वरमुपास्महे ॥
सूर्याणां प्रतिबिम्बनाय जगतामन्धतमःशान्तये
सन्मार्गेऽस्य विलोकनाय गतये लोकस्य यात्रार्थिनः । ?
तत्तन्नामसमुत्सवीत्य इमां विद्यावतां प्रीतये
व्यातेने किरणावलीमुदयनः सत्तर्कतेजोमयीम् ॥
स्फुतिविश्रमसम्भारं मानवार्तविशीर्णं
प्रविततबहुवेलप्रक्रियाजालदुःस्थम् ।
उदधिममलमल्पं तत्त्वमेतद्भवन्ति
प्रबलजडधियो ये तेऽनुकम्प्यन्त एते ॥

शास्त्रारम्भे सदाचारपरम्परापरिप्राप्ततया कायवाङ्मनोभिः कृतं परापर
गुरुनमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति प्रबन्धेति । इत्यादि ।

समाप्तिवाक्यम् । इति श्रीद्रव्यपदार्थसमाप्ते । शकाब्दाः १८८१ ।

– – – श्रीहरिरामदेवः स्वाक्षरमिदं पुस्तकम् ।
नवद्वीपे पुस्तकं चाक्षुं यातम् ॥

(ड) अमरकोषः ।

वङ्गाक्षरलिखितः ।

अन्यद्वाक्यम् । विसं १५११ । श्रावणशुक्लनवम्यां शुक्रे श्रीचम्पकारण्यनगरे विप्रराजचैत्य
(?) नारायणधीत्यादिविविधविरुदराजिविराजमानमहाराजाधिराज-
श्रीमन्मदनसिंहदेवानां सम्भुज्यमानविजयराज्ये ठक्कुरश्रीरामसूर्येण-
लिखितमिति ।

(ढ) देवीमाहात्म्यटीका ।
(दुर्गासप्तशतीटीकानाम्नी ।) वङ्गाक्षरलिखिता ।

पुष्पिका । इति श्रीविद्याभट्टपीताम्बरकृतायां दुर्गासप्तशतीटीकायां त्रयोदशे
माहात्म्ये सदृपसंज्ञानविवेचनम् ।
श्रीमानिमां हलधरोऽलिखदर्थदीपिकाया-
टीकाख्य वंशमणिरात्मज मेघमध्य (?) ।
शेषाब्धिरामयुतलक्ष्मणसेनवर्षे
माद्रे कुजे हरिपुरे हरिवासरे द्राक् ॥

१२६२

(क) महापुरुषस्तवः ।
(भागवतदशमस्कन्धीयः ।) १० पत्राणि ।
अक्षर – नेवारी । श्रीमन्नेपालिकसंवत —
ऋतुग्रहशरवर्षे ज्येष्ठमासे कृष्ण ९ ॥

(ख) अनन्तव्रतानुष्ठानम् ।
(भविष्योत्तरीयम् ।) ५ पत्राणि । अक्षर – नेवारी ।

(ग) विष्णुजन्मानुकीर्तनम् ।
(भविष्यपुराणीयम् ।) अक्षर – नेवारी ।

(घ) रामचन्द्रनामाष्टोत्तरशतम् ।
(पद्मपुराणोत्तरखण्डीयम् ।) अक्षर – नेवारी ।

(ङ) वशिष्ठदिलीपसंवादः ।
(पद्मपुराणोत्तरखण्डीयः ।) ४६ पत्राणि ।
अक्षर – नेवारी ।

(च) महालक्ष्मीमाहात्म्यव्रतव्याख्यानसमुच्चयः ।

गालवकृतः (?) । ५० पत्राणि । अक्षर – नेवारी ।

पुष्पिका । इति महालक्ष्मीमाहात्म्यव्रतव्याख्यानसमुच्चये षोडशः पटलः समाप्तः ।

सम्वत् नेपाल ६८८ नेत्रमासे शुक्लपक्षे ।

(छ) कालभैरवस्तोत्रम् ।

(काशीखण्डोक्तम् ।) अक्षर – नेवारी । १७ पत्राणि ।

(ज) अनन्तव्रतविधानम् ।

१ पत्राणि । अक्षर – नेवारी ।

(झ) अगस्त्यव्रतविधानम् ।

३ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्मणे नमः ।

अगस्त्यव्रतं प्रवक्ष्यामि । करन्यासः । अगस्त्य अस्त्राय फट् ।

अङ्गन्यासः । अगस्त्य हृदयाय नमः । इत्यादि ।

पुष्पिका । इति अगस्त्यव्रतविधानं समाप्तम् ॥

(ञ) विष्णुप्रतिष्ठाविधिः ।

खण्डितान्त्यः ।

३५ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो भगवते वासुदेवाय ।

अथ विष्णुप्रतिष्ठाविधिर्लिख्यते । तत्र आचार्यो नित्यस्नान-सन्ध्योपासन-पुरश्चरण-ब्रह्मयज्ञगायत्री — — — कुशकण्डिकां कृत्वा — — पञ्चगव्यं कृत्वा — — — जपेत ॥ इत्यादि ।

(ट) कालिकाकुलसर्वस्वे कालिकास्तोत्रम् ।

मैथिलाक्षरलिखितम् । पत्रं ११२ ।

(ठ) सिद्धान्तसारपद्धतिः ।

भोजदेवरचिता । ७१ पत्राणि । अक्षर – नेवारी ।

संवत् १८० । (प्रासादाकृति ।) कार्त्तिक ।

(ड) वैदिकमन्त्रसङ्ग्रहः । (?)

अक्षर – नेवारी । १३ – १८ पत्राणि ।

१३ पत्रे, - ॐ कन्या इव वहतु मे तन्वा वचं आना अभि चाकशीमि ।

यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवं ते ॥ इत्यादि ।

(ढ) अनन्तव्रतोद्यापनविधिः ।

२ – १५ पत्राणि । अक्षर – नेवारी ।

संवत् ८२१ आश्विनी कृष्ण ९ । ... ।

(ण) सारदास्तवः ।

६ पत्राणि । अक्षर – नेवारी । संवत् ५२० चैत्रवदि । ... ।

(त) मञ्जुश्रीसाधनम् ।

विस्तरेणं पञ्चसम् ।

(थ) षट्साहस्रम् ।

खण्डितादर्शम् ।

७९ पत्राणि । अक्षर – नेवारी ।

५ पत्रे, –

श्रीदेव्युवाच ।

श्रीमतन्तु महाज्ञानमित्याश्रितगीदपटलाधियायत् व्याख्यालक्षणविधि-

स्तथा गुरुशिष्यसमयलक्षणादिकं स्पष्टार्थम् । इति षट्साहस्रे तृतीयः

पटलः ।

पुष्पिकाः, — इति षट्साहस्रे १ । २ । ३ । ४ । ५ पटलानि ।

इति० मन्त्रव्याख्यानो ? नाम पटलः षष्ठः ।

इति षट्साहस्रे – ७ । ८ । ९ । १० पटलानि ।

इति० अघोर्य्यष्टकत्रिविधा + कुब्जस्य लक्षणम् । ११ ।

इति० द्वादशाङ्गषडङ्गमालिन्योद्धारे । १२ ।

इति० हृदयशिरोचूलीलक्षणो । १३ ।

इति० शिखाचूलीलक्षणं । १४ ।

इति० शिखास्वच्छन्दे देवस्य शिखाचूली अघोरमन्त्रोद्धारादिकम् । १५ ।

इति कक्षपुटी समाप्ता ।

इति० १६ । १७ । १८ । १९ पत्राणि ।

इति० योगिनीनां चक्रचतुर्विंशतितमः पटलः ।

(नमः पत्रमात्रं पत्रद्वयम् ।)

(ङ) देवीमाहात्म्यम् ।

(खण्डितम् ।) तालपत्रम् ।

कुब्जिकाम्नायान्तर्गत-कुब्जिकामतम् ।

अक्षर – नेवारी ।

फलकद्वयान्यस्मात् त्रिपत्रं प्रदत्तम् ।

अन्त्यभागम् । – – राजदेवस्य परमेश्वरपरमभट्टारकपरमसौगतमहाराजाधिराज-
श्रीमद्गोपालदेवस्य प्रवर्द्ध – – – – ।

११६४

महाभारतम् ।

(आदिपर्वमात्रम् ।)

११७६

(क) महालक्ष्मीमाहात्म्यम् ।

(ख) त्रिपुरसुन्दरीप्रातःस्तोत्रम् ।
(रुद्रयामलीयम् ।)

(ग) त्रिपुरास्तवः ।
(रुद्रयामलीयः ।)

(घ) त्रिपुराकवचम् ।
(सर्वार्थसाधनं नाम ।)

(ङ) कर्पूरस्तोत्रम् ।

(च) शिवकवचम् ।
(भैरवतन्त्रीयम् ।)

(झ) शिवधर्मः ।

(शान्त्यध्यायमात्रम् ।)

विवरणं प्रदत्तम् ।

(ञ) देवीमाहात्म्यम् ।

(खण्डितम् ।)

अक्षर – नेवारी ।

१४७२

(क) कुब्जिकामतम् ।

(कुलालिकाम्नायोक्तम् ।) २०० पत्राणि । अक्षर – नेवारी ।

पुष्पिका । इति कुलालिकाम्नाये श्रीकुब्जिकामते समस्तज्ञानावबोधचर्यानिर्देशो नाम पञ्चविंशतितमः पटलः । इति षड्विंशतिसाहस्रे सागरज्ञानतरं श्रीकुब्जिकाम्नाये श्री – – – – पीठविनिर्णये पञ्चविंशति(त)मः पटलः ।

सनङ्क (शतङ्क) वत्सरे पूर्णे पञ्चपञ्चाशकार्थिके ।

सदा श्रावण मासे शुक्ले पञ्चम्यां तिथिमुत्तमम् ॥ (१)

विशाख ऋक्षं नामेशु . . . . . . । (२)

लिखितं सारसंग्रहकुब्जिकामतागमम् ॥

(ख) उपाकर्ममन्त्राणि ।

४९ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्मणे नमः । पुनः सप्तऋषिभ्यो नमः ।

अथैतदुपाकर्मविधिं व्याख्यास्यामः । इत्यादि ।

(ग) देवीकवचम् ।

अक्षर – नेवारी ।

(घ) देवीमाहात्म्यम् ।

अक्षर – नेवारी ।

+ + हयगुम्मवाणाब्दगतवत्स(त्स)रे(?) मासे भाद्रे शुक्लचतुर्थ्यां ––॥

(ङ) आख्यातप्रकरणम् ।

(कातन्त्रीयम् ।) खण्डितम् । अक्षर – नेवारी ।

(च) उपाकर्मविधिः ।

अक्षर – नेवारी । संवत् १८० । श्रावण-शुक्ल द्वितीया – – – ॥

(छ) भैरवस्तोत्रम् ।

(रुद्रयामलान्तर्गतम् ।) अक्षर – नेवारी ।

(ज) आर्यातारास्तोत्रम् ।

अक्षर – नेवारी ।

(झ) देवीमाहात्म्यम् ।

अक्षर – नेवारी । संवत् ६१८ मार्गशिर – शुक्लसप्तम्यां तिथौ ।

(ञ) जीमूतवाहनावदानम् ।

क्षेमेन्द्ररचितम् । अक्षर – नेवारी ।

(ट) मालतीमाधवनाटकम् ।

अक्षर – नेवारी । संवत् २०६ फाल्गुनी शुक्लपञ्चम्यां – – – –

श्रीभक्त-शुद्धरक्षितस्य पुस्तकोऽयम् ॥

(ठ) मेघदूतम् ।

खण्डितम् । मैथिलाक्षरलिखितम् ।

(ड) शिशुपालवधकाव्यम् ।

खण्डितम् । अक्षर – नेवारी ।

(ढ) अमरकोषः ।

अक्षर – नेवारी । संवत् ६१२ ।

(ण) कुशण्डिकाकर्मविधिः ।

अक्षर – नेवारी ।

(त) यज्ञपद्धतिः ।

अक्षर – नेवारी ।

अन्त्यवाक्यम् । वरदि गगनवार्धौ धूर्जटेरक्ष सौलौ
जयति शतशतकोऽब्दान् मेचके पौष्यमासे ।
विदितकरतलार्क्षे भानुवारे विशिष्टे
लिखितमिति सम्पूर्णा पद्धतिं सारदृश्याम् ॥

(थ) सिद्धपञ्चाशिका ।

८ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । श्रीआदिनाथपादुकेभ्यो नमः ।
श्रीमच्चन्द्रेन्द्रकाचले रम्ये सद्वाट ? शिखरे स्थितम् ।
सर्वज्ञं स(श)वरं घोरं शिवं परमकारणम् ॥
उपसङ्गम्य विधिना देवदेवं जगद्गुरुम् ।
प्रणिपत्य महेशानी पृच्छति स्म महेश्वरम् ॥
सिद्धान्तश्चैव वामं दक्षिणश्चैव गारुडम् ।
भूतनन्त्रश्च देवेश कुलशास्त्राण्यनेकधा ॥
मया श्रुतानि श्रीनाथ त्वया निगदितानि च ।
इदानीं ज्ञातुमिच्छामि कुलमूलावतारकम् ॥
ऊर्द्धं सृष्टिमधः सृष्टिमधोऽधःसृष्टिरेव च ।
कथयस्व प्रसादेन यद्यहं तव वल्लभा ॥ इत्यादि ।

अन्त्यवाक्यम् । इति सिद्धपञ्चाशिकायां चन्द्रपीठविनिर्गतायां मूलनाथावतारितायां दिव्याज्ञागुणप्रकाशिकायां कुलालीनक्रमसूत्रसमायां पञ्चमः पटलः समाप्तश्चेयं श्रीसिद्धपञ्चाशिका । इति श्रीमहादेवेनालेखि ॥

(द) कुब्जिकामतम् ।

६८ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ सिद्धिः । भैरवाय नमः ॥
ॐ ह्रीं श्रीं ऐं क्रुं हुं ह्रीं क्रीं फः ।
प्रणिपत्य अनादिनाथं अनाथभूतौघामोघनिर्मथनम् ।
सततानन्दितमनसं सुरासुरवन्दिताङ्घ्रियुगम् ॥

श्रीकुब्जिकोवाच ।

किं दर्शिताब्धसन्तानसुविकाशाम्बराश्रिने ।
अकोदिवप्रकाशाय नमः श्रीनाथभानवे ॥
देशिता देवदेवेश अज्ञानपटलोद्धृतम् ।
आगमाम्नायसिद्धान्तैः साम्प्रतं वर्तते कथौः ॥
यत् तत् कुलक्रमायातं कुलाम्नीतनुतां गतम् ।
सूत्रसङ्घट्टनिर्मिन्ना कल्पसन्धिविवर्जितम् ॥ २
अपरं सुद्रढियौघं निष्कैवल्यं कथं प्रभा ।
पूर्वोक्तवाक्यसंयुक्त यथायातं कुलेश्वर ॥
पीठानि पीठनाथश्च पीठदेव्यश्च पालकाः ।
क्षेत्रद्वारकुलानाथं क्रमशोपसमन्वितम् ॥
तथा पीठविधैः पीठैर्द्वीपदेव्या समन्वितम् ।
पश्चोभनाश्च चत्वारि पुष्पाण्युपोत्तगाणि च ॥
पालकैश्च चतुस्त्रिंशैरिद्धविधैरेवमेव हि ।
एवमादिभिरन्यैश्च कुब्जग्रन्थसमागमम् ॥
श्रीमतीयं सुरेशान सारात्सारतरं महत् ।
कथं पीठान्तिस्थानोक्ताः कुलाकुलविभागशः ॥
दं प्राप्तिकामपर्यन्तं कथ्यते किं कुलेश्वर ।
भवपञ्च प्रसादेन अल्पग्रन्थार्थविस्तरम् ॥
अन्यच्च यत्र पृष्टोऽसि अज्ञानमतिना मया ।
तत्सर्वं कथ हे नाथ कुलसारं सुदुर्लभम् ॥ इत्यादि ।

अन्तवाक्यम् । निरूढं समाप्तम् ॥
पण्डित श्रीमहादेवेन लिखितम् ॥

पुष्पिकाः ;— इति निरूढे ज्ञानसद्भावे दिव्यौघे कुब्जिकामते ।
आम्नायसारे योगश्च तदाख्यातं वरानने ॥
इति निरूढे ज्ञानसद्भावे दिव्यौघे कुब्जिकामते ।
वाधिष्ठानसमायोगे तदाख्यातं कुलाम्बिके ॥
इति निरूढे ज्ञानसद्भावे दिव्यौघे कुब्जिकामते ।
द्वीपमार्गं मया ख्यातं त्वत्प्रियार्थं कुलोत्तमे ॥

(ध) योगपीठः ।

५ पत्राणि । अक्षर – मैथिली ।

पुष्पिका ;— योगपीठे कर्मोदयो नाम १मः पटलः ।

,, ,, ,, २यः पटलः ।

(ततो नास्त्यन्या पुष्पिका ।)

(न) रत्नपरिशिष्टम् ।

अक्षर – नेवारी । ३८ पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमो नारायणाय ।

विष्टकल्पं वा स्वगृह्योक्तं यत्र कर्म्म प्रकीर्त्तितम् ।

तत्र सन्ति शास्त्राणि – – – कृत मनम् ॥

इति रत्नपरिशिष्टम् । इत्यादि ॥

(प) पराशरस्मृतिः ।

अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो गणेशाय ।

अथातो हिमशैलाग्रे देवदारुवनाश्रये ।

व्यासमेकाग्रमासीनं ऋषयः पृच्छति – – ॥

मानुषाणां हितं धर्म्मं वर्तमानं कलौ युगे ।

शौचाचारं – – वद सत्यवतीसुत ॥

– – – – – व्यासो दीप्तार्कसन्निभः ।

प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ॥ इत्यादि ।

अन्त्यवाक्यम् । यादृशं पुस्तकं + + + + + + ।

+ + + + + + + + ॥

पुष्पिकाः । २ पत्रे ;— इति पराशरधर्मशास्त्रे प्रथमोऽध्यायः ।

५ ,, ,, ,, ,, द्वितीयः ।

७ ,, ,, ,, ,, तृतीयः ।

९ ,, ,, ,, ,, चतुर्थः ।

११ ,, ,, ,, ,, पञ्चमः ।

१४ ,, ,, ,, ,, षष्ठः ।

१७ पत्रे,— इति पराशरधर्मशास्त्रे सप्तमः ।

१९ ,, ,, ,, ,, अष्टमः ।

२१ ,, ,, ,, ,, नवमः ।

२४ ,, ,, ,, ,, दशमः ।

२५ ,, ,, ,, ,, एकादशः ।

२६ ,, ,, ,, ,, द्वादशः ।

१४७५

(क) मानवधर्मशास्त्रम् ।

(खण्डितम्) नेवाराक्षरम् ।

(ख) मवसारप्रदीपः ।

(आदिखण्डितः ।) मैथिलमक्षरम् । शकाब्दाः १३८७ । सोमवार ।

अर्कवालकयौतश्रीनाथदत्तस्यात्मजम् ।

(ग) चाणक्यश्लोकाः ।

मैथिलमक्षरम् ।

(घ) अमरकोषटिप्पणी ।

अक्षर — नेवारी ।

(ङ) छन्दोभेदः ।

अक्षर — नेवारी ।

(च) रूपावतारव्याकरणम् ।

मैथिलमक्षरम् । १२१ पत्राणि ।

प्रारम्भभागः । ॐ नमः शिवाय ।

सर्वेषामपि मनसां बालप्रबोधनार्थमहम् ।

रूपावतारमल्पं सुकलापसूत्रं करिष्यामि ॥

जिनाचारसमासप्रसाधितस्य सर्वेश्वरात् ।

कृतकं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

कृता सुकृतिना येयं प्रक्रिया धर्मकीर्तिना ।

बोधानां बोधवत् क्षिप्रं प्रकाशो बालकाभिनाम् ॥

तत्रादौ तावत् प्रत्याहाराः शास्त्रे संज्ञासंव्यवहारस्थापनार्थमनुक्रम्यन्ते ।

तद्यथा अ इ उ ण । इत्यादि ।

अन्तवाक्यम् । रेफ लकारस्तथा वेति विशषणार्थः । पटुजातीयः । मृदुजातीय । इति

वर्णाधिकारः समाप्तः । सम्वत् ३६७ भाद्रशुदि ५ शनौ ।

(क) शारीरकमीमांसाभाष्यम् ।

(चतुर्थाध्यायः ।) शङ्कराचार्यकृतम् । मैथिलाक्षरम् ।

१५०८

(क) वौद्धाधिकारव्याख्या ।

(सर्वदर्शनान्तर्गता ।) नरहरिकृता । मैथिलाक्षरम् । ७१ पत्राणि ।

प्रारम्भवाक्यम् । श्रीनरसिंहाय नमः ।

नमदन्तुवनीभुजां शिरोभि र्दलयन्नुत्कुलनालैः सदैव ।

रमेन शरासनं पुरारेर्भविकं मामकमातनोतु रामः ॥

सुतया पितृचरणानामवगतमन्तर्भवारिणा ।

क्रियते श्रीनरहरिणा व्याख्या वौद्धाधिकारस्य ॥

सकामिकामनया कृतं प्रणामं शिष्यशिक्षार्थं निबध्नाति स्मार्तार्थानि ।

इत्यादि ।

(ख) भगवद्गीता ।

अक्षर – नेवारी । संवत् ४८१ । माघशुक्लनवम्यां तिथौ ।

(ग) प्रह्लादचरित्रम् ।

(विष्णुपुराणीयम् ।) अक्षर – नेवारी ।

(घ) गोपालध्यानराजः ।

(गोपालतन्त्रीयः ।) अक्षर – नेवारी ।

(ङ) देवीमाहात्म्यम् ।

मागराक्षरम् । संवत् १४९२ । समये भाद्रशुदि .. महाराजा ....

पृथ्वीसिंहदेवभुज्यमानराज्ये चम्पकारण्यनगरे । शुभमस्तु ।

(च) वैशाखमाहात्म्यम् ।

(पद्मपुराण-पातालखण्डीयम् ।) अक्षर – नेवारी ।

(छ) रामायणम् ।

(उत्तरकाण्डम् ।) अक्षर – नेवारी ।

अन्त्यवाक्यम् । मुनिवाणगजे वर्षेषाढे मासि पाखरे ।

कार्ये शुभे रामकथां लेखयित्वा[illegible]

(ज) शिवरात्रिविधानम् ।

शौनकप्रोक्तम् । (पद्मपुराणीयम् ।)

(झ) वशिष्ठदिलीपसंवादः ।

(पद्मपुराणान्तर्गतखण्डीयः ।) अक्षर – नेवारी ।

(ञ) भगवद्गीता ।

अक्षर – नेवारी ।

अन्त्यवाक्यम् । [illegible] मार्गशिर मासे शुचौ (?)

.. .. ।

.. ..

.. .. ॥

(ट) कृत्यकल्पतरुः ।

(आद्यन्तवर्जितः ।) लक्ष्मीधरकृतः । अक्षर – नेवारी ।

(ठ) प्रतिष्ठातन्त्रम् ।

अक्षर – नेवारी । (आदिखण्डितम् ।)

अन्त्यवाक्यम् । इति निबन्धाख्यं [illegible] प्रतिष्ठातन्त्रं समाप्तम् ।

[illegible] उत्तरे सुसंयाते

फाल्गुनमासशुक्लपक्षे [illegible] शुभे ।

श्रीमन्नरेन्द्रदेव राजेन्द्र [illegible]

[illegible] गृहपति पशुपतिपादाब्ज[illegible] ॥

[illegible] । ?

वैखानसाभिधानं पुस्तकमभिलिखति भक्तिचित्तेन ॥

पुष्पिका :— इति वैखानसे [illegible] पटलः ।

" " [illegible] पटलः ।

इति देव्यागमे यात्रायोगलक्षणम् ।

" " भित्तिबन्धनम् ।

" " भूमिबन्धनम् ।

" " गुरुशिष्यविज्ञापनम् ।

" " प्रासादाच्छादनम् ।

" " भित्तिप्रमाणनियमः ।

" " सूत्रपातलक्षण – – ।

" " शल्योद्धारलक्षणम् ।

१५०४

(क) उपाकर्मस्नानविधिः ।

अक्षर - नेवारी ।

(ख) शान्तिमन्त्राणि ।

२७ पत्राणि । अक्षर नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्मणे । ॐ स्वस्ति नो मिमीतामश्विनाभगः स्वस्ति देव्यदिति – – – । स्वस्ति पूषा असुरो दधातु नः स्वस्ति । इत्यादि ।

अन्तवाक्यम् । विश्वेदेवाः शान्तिः ब्रह्म शान्तिः + + शान्तिरेव शान्तिः + + शान्तिरेधि । शुभं भवतु संवत् ६६७ भाद्र ... ।

(ग) देवीमाहात्म्यम् ।

मैथिलाक्षरम् । लसं ३९२ (?) पौषवदि ३ बुधे महाराजाधिराजश्रीकंसनारायणदेवप्रचारेण – – – – प्रशासति भूपतिषु – – श्रीउदयकरेण लिखितेयं पुस्तीति । श्रीरामभद्रलक्ष्मणाभ्यां नमः ॥

(घ) मृत्युञ्जयस्तवः ।

अक्षर – नेवारी ।

अन्तवाक्यम् । इति पारमेश्वरे चतुरशीतिसाहस्रे मृत्युञ्जयस्तवः समाप्तः ॥

(ङ) देवीमाहात्म्यम् ।

अक्षर – नेवारी । संवत् ३८५ । मार्गशिर .. श्रीराजाधिराज ....

श्रीमन्मानमल्लदेवस्य विजयराज्ये श्रीश्रीश्रीलोचना ? मधिवासिना श्रीमोक्षनागशालि – – – – – ॥

(घ) देवीमाहात्म्यम् ।

अक्षर – नेवारी । राजाधिराज .. श्रीश्रीधर्ममल्लदेवस्य विजय-राज्ये । संवत् ५१८ माघकृष्णदशम्यां .... यजमान्यार्थे-श्रीगुणल-वन्तुना लिखितम् । शिवमस्तु सर्वजगताम् । .... ॥

(ङ) प्रबोधचन्द्रोदयनाटकम् ।

(प्राचीनतमा लिपिः किन्तु आरम्भे च कानिचित् पत्राणि नवीन-लिखितानि सन्ति ।) अक्षर – नेवारी ।

(ङ) नन्दाख्यानकथा ।

अक्षर – नेवारी ।

प्रारम्भभागः । ॐ नमः सर्वज्ञाय ।

तत्सत्पत्नकथा यत्र बुद्धिपद्मप्रबोधिनी ।
आदिमध्येधितमिदं तां लिखाम्यामि यत्नतः ॥

ततो नेपाली भाषा —

श्लोका —

३० पत्रे ;— यस्य बुद्धिः सुखं तस्य निर्बुद्धेस्तु कुतः सुखम् ।
सर्वदुःखमध्यस्थो निष्क्रान्तो जम्बूको धिया ॥ इत्यादि ।

ततोऽस्य श्लोकस्य भाषयानुवादः ।

६४ पत्रे ;— अर्थमाप्नोऽपि पापेन यः पापान्न निवर्त्तते ।
आमाद्यति दुर्मेधा .... कर्कटमाश्वत् ॥

ततोऽस्य श्लोकस्य भाषयानुवादश्च ।

अन्तभागः । संवत् ७२१ । कार्त्तिक ।

१५२१

(क) वशिष्ठदिलीपसंवादः ।

(पद्मपुराणोत्तरखण्डीयः ।) अक्षर – नेवारी ।

(ख) विविधविद्याविचारचतुरा ।

प्रारम्भवाक्यम् । ॐ नमो नारायणाय ।

सर्व्वकामावाप्तये शान्तिकपौष्टिकान्युच्यन्ते । तत्र नवग्रहमखास्त्रिविधः
अयुतहोमो लक्षहोमः कोटिहोमश्चेति ॥ इत्यादि ।

अन्तवाक्यम् । वाजपेयातिरात्राभ्यां हेमन्तशिशिरे स्थितम् ।
अश्वमेधसमं प्राहुर्वसन्ते चैव यत् स्थितम् ।
ग्रीष्मे च स्थितं तोयं राजसूयाद् विशिष्यते ॥
एतन्महाराजविशेषधर्म्मान् करोति यो धर्म्मपरः सुबुद्धिः ।
स याति रुद्रालयमाशु पूतः कल्पाननेकान् दिवि मोदते च ॥
अनेन लोकान् समहस्तपादान् भुक्त्वा परार्द्धद्वयमङ्गनाभिः ।
सहैव विष्णोः परमं पदं यत् प्राप्नोति तद् योगबलेन भूयः ॥

पुष्पिका ;— इति श्रीमद्भोजदेवविरचितायां विविधविद्याविचारचतुराभिधानायां
नवग्रहमखतुलापुरुषादिमहादानादिकर्म्मपद्धतौ तडागवापीकूपप्रतिष्ठा-
विधिः । परिसमाप्तश्चेयमिति ॥ समस्तत्यादि महाराजाधिराजवर-
कुमारश्रीमद्गदाधरदेवपादानामाज्ञया श्रीशुभपतिभिर्लिखितमिदं पुस्तक-
मिति । लसं ३७२ । श्रावणवदि १ शुक्रे श्रीरत्नधरनगरे । ॐ नमो

अक्षर - नेवारी । संवत् २९६(?) चैत्रशुक्लप्रतिपद्यां ... श्री
परमेश्वर श्री ज + ल देवस्य विजयराज्ये पुस्तकोऽयं लिखितः । ...

(घ) प्रतिष्ठातत्त्वम् ।

रघुनन्दनकृतम् । वङ्गाक्षरलिखितम् ।

अन्तवाक्यम् । वह्नितिथे शकाब्दे समन्वयपञ्चितारकाधीशैः ।
श्रीमत्फाल्गुनमासे शुक्लप्रतिपत्तिथौ शुक्रे ॥
अलिखत् केशवशर्म्मा ।

(ङ) वशिष्ठदिलीपसंवादः ।

(पद्मपुराणोत्तरखण्डीयः ।) अक्षर - नेवारी ।

(ख) धूर्तसमागमनाटकम् ।

ज्योतिरीश्वरकृतम् । ११ पत्राणि । अक्षर – नेवारी ।

प्रारम्भभागम् । ॐ नमो गणेशाय ।

हर्षोत्फुल्लाननाब्जप्रहसितशिशिरमधुरं ध्वनति प्रीतिमत्या-
+ + मंगलौ पुरारेर्दु + ति परिणये मानसं क्षुभ्यमाणे । (?)
नाऽयं शक्नोति कर्तुं मतिमिति भयं वीक्ष्य चन्द्रः सहासो
दृष्ट्वा सद्वृत्तमाशु स्मितमुखगमुखः पातु वः पञ्चवक्त्रः ॥

अपि च । उक्तामर्मोक्ति शिक्षिना सर्वाङ्गता यदोष्टि स्फारिताः
ज्योत्स्नामील गुम्फिताक्ष्णयोरक्ष्णोः पुनर्विद्रुमाः ।
पार्श्वेशाः प्रतिमार्गविभ्रमगतयस्सन्ति(स्तु) भद्राणि वो
त्रिपुरान्तकपुष्पमार्गणशरैरीशस्य दूराभ्रुवः ॥

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । यतः –

नानायोधनमत्तनिर्जितसुरत्राणप्रमत्तावनी-
नृत्यत्कौमुदकबन्धसंकुलधरादृप्यत्सिमबन्धुरः ।
अस्ति श्रीहरसिंहदेवनृपतिः कार्णाटचूडामणि-
र्दुष्प्रापार्थिवमार्गमौलिमुकुटन्यस्ताङ्घ्रिपङ्केरुहः ॥
तस्योद्दण्डभुजप्रतापदहनज्वालाविरक्ता यदा
राज्ञः सर्वगुणानुरागपरवौविद्योतमानाग्रजः ।
यो धीरेश्वरजन्ममौलितिलको ज्ञाताखिलाशास्त्र-
स्तस्य श्रीकविशेखरस्य कविता मन्त्रित्वमालम्बते ॥

तदनेन सकलसङ्गीतविद्याविशारदविद्योतमानभिनवभरतेन ....
श्रीरामेश्वरपौत्रेण तत्रभवतः पवित्रकीर्तिधीरेश्वरस्यात्मजेन महोपाध्याय-
श्रोत्रियेश्वरश्रामतएणाब्जजन्मभूमिनायककविशेखराचार्यश्रीज्योतिरीश्वरेण
निजकृतमुपरचितं धूर्तसमागमं नाम नाटकं अभिनेतुमादिष्टोऽस्मि
इत्यादि ।

अन्तभागम् । इति निष्क्रान्ताः सर्वे ।

पुष्पिका ;— कविशेखराचार्यश्रीज्योतिरीश्वरविरचितं धूर्तसमागमं नाम नाटकम् ।

(छ) रागमाला ।

अक्षर – नेवारी । ३ पत्राणि ।

कागजलिखितायाः पुस्तकस्य विवरणं प्रदत्तम् ।

(ज) सङ्गीतसर्वस्वम् ।

(अन्तखण्डितम् ।) जगज्ज्योतिर्मल्लकृतम् । अक्षर – नेवारी ।

प्रारम्भभागः । ॐ नमो नृत्यनाथाय ।

स्मर्यङ्गायमनोपठौर्यात तत्लिङ्गोर्पीयति श्रोस्कलं

यद् रङ्गीयति मर्दलीयति घनस्तारा च पुष्पोर्गति ।

गौरी यत्र नटीयतीन्दुतरमा: यत् कांस्यतालीयतः

शम्भोस्त्रिभुवनाश्रम श्रुतिरियं भूयात तव श्रेयसे ॥ (१)

माधुर्य्यं पञ्चमसङ्गीतशास्त्रसङ्गीतशेखरम् ।

नाट्यशास्त्रमसङ्गीतकल्पद्रुमी निरूपयन् ॥

दशरूपं रत्नकोषं भरतोक्तार्थकं तथा ।

सङ्गीतसर्वस्वमिदं तनोति श्रीजगज्ज्योः ॥ इत्यादि ।

(झ) भाषावृत्तिव्याकरणम् ।

(आद्यन्तखण्डितम् ।) मैथिलाक्षरम् ।

(ञ) काव्यप्रकाशः ।

मैथिलाक्षरम् ।

(ट) सिद्धसन्तानसाधनसोपानपद्धतिः वा श्रीमत्पद्धतिः ।

(आद्यन्तखण्डिता ।) यशोराजकृता ।

३१ पत्राणि । अक्षर – नेवारी ।

पुष्पिका: ;— इति गोपालजश्रीयशोराजविरचितायां सिद्धसन्तानसाधनसोपानपद्धत्य-भिधानायां सिद्धमार्गप्रकाशायां श्रीमत्पद्धत्यां ग्रन्थावतारः प्रथमः पटलः ।

इति० गुरुशिष्यविचारो नाम । २ ।

„ वेधदीक्षाविधानो नाम । ३ ।

„ शास्त्राभ्युदयविचारो नाम । ४ ।

इति॰ वेधपर्युत्तविचारो नाम । ५ ।

" परीक्षानुग्रहो नाम । ६ ।

" समर्यादविचारे सत्पथदर्शनो नाम । ७ ।

" आचार्याभिषेकविधाने वस्तुसिद्धिनिर्णयो नाम । ८ ।

" आचार्याद्यर्थं मन्त्रोद्धारो नाम । १० ।

" महाभागावलोकनं नाम योगपटलः । ११ ।

" भाग्यपुराणदशजपविधाने देशाक्षरनुक्रमणम् । १२ ।

" कुलमार्गभैरवीविधाने षोडशाक्षरविनिर्णयो नाम । १३ ।

" योगिनीनामसूत्रं नाम । १४ ।

" ज्ञानषट्कविचारो नाम । १५ ।

(ठ) देवीमाहात्म्यम् ।

(खण्डितम् ।) अक्षर – नेवारी ।

(ड) विमलावती ।

(आदौ त्रुटिता अन्ते च खण्डिता ।) अक्षर – नेवारी । १०३ पत्राणि ।

प्रारम्भवाक्यम् । नत्वा आदिमली .. .. ।

पूजाहोमपवित्रदामन ...... स्तुमो कुर्महे ॥

पुस्तकोऽयमतिस्फुटयां बोधवार्तायोः

अच्छाराधापारभीम मधु + + + + व×म ।

नत्वा वा शंभपितृगणसभासि + + + अबोधकम्

मार्गधर्मे शिवाचार्यसूर्यमाचार्यकार्यकम् ॥ (?)

अयोध्याद रजन्यां पुथिवीं + + पुथि वशा ।

पराधायमाद्यह्याक्षुयोगं + + + मध्यमम् ॥ इत्यादि ।

पुष्पिका ;— विमलावत्यां पूजाविधिः प्रथमः ।

" होमविधिः । २ ।

" पवित्रविधिः । ३ ।

६६ पत्रे ;- " दामनविधिः (?) । ४ ।

१०३ पत्रे ;- " दीक्षाविधिः । ५ ।

अतो नास्ति पुष्पिका ।

१५५७

(क) देवीमाहात्म्यम् ।

(खण्डितम् ।) अक्षर – नेवारी ।

(ख) मयमङ्गहः । वा प्रतिष्ठातत्त्वम् ।

(आदिखण्डितम् ।) अक्षर – नेवारी ।

पुष्पिका :— मयमङ्गहे वास्तुविधिश्चतुर्थः परिच्छेदः ।
मयमङ्गहे प्रासादविधान पञ्चमः ।
इति मयमङ्गहे प्रतिष्ठातत्त्वं समाप्तम् ।

(ग) अनुस्मृतिस्तवः ।

(विष्णोरनुस्मरणम् ।) अक्षर - नेवा[illegible]

(घ) अमरकोषः ।

(स्वर्गवर्ग ।) मैथिलाक्षरम् ·

(ङ) नरपतिजयचर्य्या ।

(खण्डिता ।) अक्षर – नेव

(च) [illegible]

[illegible]क्षरम् ।

१५५८

चान्द्रव्याकरणम् ।

वृत्तिसहितम् । (द्वितीयाध्यायपर्य्यन्तम् ।) अक्षर – नेवारी ।

१६४ पत्राणि ।

१५५९

(क) देवीमाहात्म्यम् ।

अक्षर – नेवारी ।

अन्तवाक्यम् । शुभमस्तु संवत् ६५८ ज्येष्ठशुक्ले पञ्चमीघटितषष्ठ्यां लिखितं समाप्ती-
कृतमिति । श्रीश्रीअभयमल्लदेवस्य विजयराज्ये लिखितम् ।

(ख) व्याकरणशास्त्रम्।(?)

(आद्यन्तखण्डितम्।) ९१ पत्राणि। मैथिलाक्षरम्।

२य पत्रस्य प्रारम्भभागम्। आदिरन्त्येन इता सहोच्चार्यमाणेन सह स्वमध्यपातिनां वर्णानां ग्राहको भवति। इत्यादि।

पुष्पिकाः ;—

४ पत्रे। इति संज्ञावतारः।

१५ पत्रे। इति संहितावतारः।

६३ पत्रे। इति विभक्त्यवतारः समाप्तः।

६४ पत्रे। इति विभक्तिविभागः समाप्तः।

७१ पत्रे। इति कारकावतारः समाप्तः।

७३ पत्रे। इति प्रत्ययावतारः समाप्तः।

७८ पत्रे। इति समासावतारः समाप्तः।

८१ पत्रे। इत्यनुकाधिकारः समाप्तः। (?)

(ततो नास्त्यन्या पुष्पिका।)

(ग) इष्टिसूत्रम्।

(कात्यायनोक्तम्।) अक्षर – नेवारी।

(घ) देवीमाहात्म्यम्।

अक्षर – नेवारी।

अन्त्यम्। महाराजाधिराजपरमेश्वरपरमभट्टारकश्रीमदभयमल्लदेवस्य विजयराज्ये।

.. .. ..

(ङ) श्रीकापालेश्वरीभीमादेव्याः पूजापद्धतिः।

(पितृनिर्माल्यभिक्षाभिधेया।) अक्षर – नेवारी। ५ पत्राणि।

(च) निदानम्।

विवरणं प्रदत्तम्।

(छ) एकादशीव्रतविधानम्।

अक्षर – नेवारी।

(ज) एकादशीमाहात्म्यम्।

अक्षर – नेवारी।

(झ) एकादश्युत्पत्तिः ।

अक्षर – नेवारी ।

(ञ) रामायणम् ।

(उत्तरकाण्डम् ।) (कतिपयानि पत्राणि ।) मैथिलाक्षरम् ।

(ट) वामकेश्वरीमतटिप्पनम् ।

अक्षर – नेवारी । ८० पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमः शिवादिभ्यो गुरुभ्यः । ॐनमस्त्रिपुरभैरव्यै ।

Beginning. श्रीगणेशाय नमः ।

प्रणम्य भरतो भक्त्या सर्व्वेशं शिवदं शिवम् ।
गीतस्य लक्षणं प्राह वादिमत्तगजाङ्कुशः ॥
धर्म्मार्थकाममोक्षाणां साधनं गीतमुच्यते ।
अतस्तु तत् प्रयत्नेन गेयं श्रोतव्यमेव च ॥
गुरुदेवद्विजातीनां यत् पुरो गीयते नरैः ।
तद्धर्म्माय भवेत् तेषां स्वर्गाय विजयाय च ॥
भूमिपार्थन्तु यद्गीतं तत् सर्व्वं जनयेत् फलम् ।
सम्मानं सम्पदः प्राप्तिं प्रसिद्धिञ्च धरातले ॥
यद् गीतं रमणीकर्णे मधुरं याति कृत्स्नशः ।
तेन काममवाप्नोति यद्यपि स्याद् विरूपकः ॥
स्वेच्छया गीयमानोऽपि गीयते यत् स्वशक्तितः ।
तन्मोक्षाय भवेत् पुंसां निष्कामानां न संशयः ॥

स्कन्दपुराणे ।

वाद्यं गीतं तथा नृत्यं त्रेधा तदिति कीर्त्तनम् ।
नाट्यभेदान् ददौ पूर्व्वं भरताय चतुर्मुखः ॥ इत्यादि ।

End. आसावरीरागे । . . . . . .

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद्वासः कनककपिशं वैजयन्तीञ्च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्त्तिः ॥

Colophon इति श्रीरागमालायां रागरागिणीशब्दरचनापूर्वकध्यानकथनं समाप्तम् ॥ हरिर्हरतु दुरितम् । शङ्करोतु शङ्करः ॥

विषयः । रागवेलानिरूपणम् । रागरागिणीशब्दरचनम् । रागरागिणीनां ध्याननिरूपणम् ।

---

(२) ४० । राजकल्पद्रुमः. By राजेन्द्रविक्रमदेवशाह. 12 x 4 inches. Folia 73. Lines, 7 on a page. Extent, 1,213 çlokas. Character, Nāgara. Date, ?. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

गणेशं प्रणिपत्यादौ श्रीमद्राजेन्द्रविक्रमः ।
कवीश्वरः प्रतनुते राजकल्पद्रुमं शुभम् ॥ १ ।

सर्वाद्भुताखिलविपक्षमखलो
विक्रमो हिमगिरौ समागतः ।
स्पष्टशिखरादिति ख्यातं
प्रोक्तः कुलपुराणपण्डितैः ॥ २ ।

तदन्वयो जिल्लराजोऽभूज्जितसात्मजो नृपः ।
घटलुराजस्तस्माच्च कृपाराजस्तदात्मजः ॥ ३ ।

ततो विर्मानिराजोऽभूद्धरिराजस्तदात्मजः ।
श्रीवस्थराजस्तत्पुत्रस्तस्मात्कृष्णभूपतिः ॥ ४ ।

श्रीनिरयानो ह्यभवत् सूर्यस्तात्मजस्ततः ।
श्रीधाष्णनः सुतस्तस्य श्रीविचित्रस्ततः स्मृतः ॥ ५ ।

राजा वीर्यस्निरासीद् गुणगणगणिता श्रीयशो भक्षयाशौ
तत्पुत्रो दृव्यशाही त्रिभुवनविजयप्रोद्युतो भाजकाले ।
सोऽथोऽपि पुण्यशौ क्षितिभुवनाहिते भाद्रमासे यशस्वी
कलाशाली स रामो घनद इव धनी जिष्णुतुल्यो नरेन्द्रः ॥ ६ ।

हुंकारोऽस्तु ततोऽभूत् नृपतिरिव यो धर्मनीयः सुनीतिधीरो वीरः स राजा विदितपरमतो वेदवेदाङ्गवेत्ता ।
आज्ञापालनभक्तत्वात् तदधिपतनयः पूर्वभृत् पूर्वशाही
पूर्वांशोऽसौ यतोऽसौ नृपवरतनयो राज्यमाविवेश ॥ ७ ।

श्रीमान् गोरक्षदेशे समभवदपि यो रामसाहीक्षितीश-
स्तस्याभूत् पुत्रधुर्य्यो नृपकुलतिलको डम्बराख्यो महीशः ।
तस्मात् श्रीकृष्णसाहिर्हरिरिव विदितो जात एतस्य पुत्रः
शूरः श्रीमद्रमाख्यो सकलगुणगणालङ्कृतः सद्यशा ॥ ८ ॥
अर्जुनसाह्यराजा यो नाभितशत्रुस्तदात्मजो धीरः ।
श्रीपृथ्वीपतिसाहिर्वीरस्ताधीश्वरो वीरः ॥ ९ ॥
श्रीमद्गोरक्षशैले क्षुदर्धगिरिगतः सूर्य्यवद्भासमानो
राजा श्रीश्रीभद्रनरदीपपतिसुतो रामचन्द्रेण तुल्यः ।
पुत्रस्तस्यातिशूरोऽर्जुन इव समरे शत्रुहन्ता महात्मा
श्रीदुर्गाभक्तियुक्तस्तदनु च नरभूपालसाहो नरेन्द्रः ॥ १० ॥
स्कन्दः शिवस्येव हरेर्जयन्तः शौरेर्हरिः पोस्तरयस्य रामः ।
तस्यात्मजो भव्ययशार्थपृथ्वीनारायणाख्यो नृपतिर्बभूव ॥ ११ ॥
पृथ्वीनारायणो यो गुणगणगणितो जिष्णुतुल्यः स राजा
जित्वा नेपालभूपान् स्वयमपरिमितां राज्यलक्ष्मीं विधाय ।
श्रीमान्कुष्कन्दवक्त्रक्षितिमितसुशके भाद्रशुक्लेतरायां
भूते घोरे महात्मा त्वमरगतिमुखं कान्तिनाम्नां नगर्य्याम् ॥ १२ ॥
बभूवतुर्द्वौ गिरिशात्मजाभौ सुतौ सुविक्रान्ततरौ हि तस्य ।
प्रतापसिंहः प्रथमो हि राजा भ्राता बहादूर इति प्रसक्तः ॥ १३ ॥
प्रतापसिंहाधिपराजपुत्रो लोके प्रसिद्धो रणबाहदूरः ।
गीर्व्वाणयुद्धाभिधविक्रमस्तु तस्यात्मजन्माजनि कृष्णतुल्यः ॥ १४ ॥
श्रीमहाराजगीर्व्वाणयुद्धविक्रमवर्म्मणः ।
राजेन्द्रविक्रमो राजा सुतः सर्व्वगुणान्वितः ॥ १५ ॥

इह खलु वैदिकस्तान्त्रिको मिश्र इति त्रिविधा मखः त्रयाणामेषामुक्ते-
नैव विधिना मां समर्चयेदित्यनेन तान्त्रिकक्रियायोगस्य परमपुरुषार्थ-
त्वाद्राजकल्पद्रुमाभिधानतान्त्रिकविषयकप्रकरणाभिधानं सफलम् । तत्र
हि दीक्षितस्यैव सर्व्वकर्म्मस्वधिकारात् पूर्व्वं दीक्षाप्रकार उच्यते ॥
इत्यादि ।

End. एवं यः पूजयेद्देवं त्रिकालं धर्म्मसाधनम् ।

न जातु योगिभिर्दुःखैः पीड्यते हरिचित्तः ॥

Colophon. इति श्रीमहाराजराजेन्द्रविक्रमसाहविरचिते मन्त्रकल्पद्रुमे पञ्चाय-
तनपूजाकथनं समाप्तम् ।

यावद् दुर्गाहरिहरविधिविघ्नराड्यो देववर्गा
यावन्मेरुप्रभृतिगिरयो तारकाश्च सिद्धाः ।
यावद् गङ्गा वहति गगने सागरेऽप्यस्ति चाम्बु
तावद्भूम्यः प्रचरतुतरां राजकल्पद्रुमोऽयम् ॥

इति श्रीगिरिराजचक्रचूडामणि ...... कान्तिपुरविराजमान
. ... विक्रमसाहदेवस्य सुतेन महाराजराजेन्द्रविक्रमसाहदेवेन
विरचिते राजकल्पद्रुमाभिधाने मन्त्रशास्त्रनिबन्धे चतुर्दशः पूजापटलः ॥

विषयः । इति श्रीमन्महाराजराजेन्द्रविक्रमसाहकृते राजकल्पद्रुमे दीक्षाप्रयोगः
प्रथमः पटलः ।
इति ० पुरश्चरणनिर्णयः । २ ।
" दीक्षाप्रयोगः । ३ ।
" द्वारपूजादिमातृकान्यासान्तः । ४ ।
" पीठपूजादिलोकपालान्तपूजाकथनम् । ५ ।
" अग्निप्रकाशः । ६ ।
" ७ । ८ ।
" विष्णुमन्त्रप्रकरणम् । ९ ।
" शिवमन्त्रादिकथनम् । १० ।
" ११ ।
" यजुर्वेदविधानोक्तं धनुर्वेदमन्त्रदीक्षाप्रकरणम् । १२ ।
" १३ ।
" पूजापटलः । १४ ।

---

(२) ३२ ।) रागविधानसारः. By रघुनाथसूरि. 12 x 4 inches. Folia, 30. Lines, 6 on a page. Extent, 360 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः । श्रीगुरुचरणाभ्यां नमः ।

प्रणम्य गोविन्दपदारविन्दं
वन्दे गिरं गौरवमङ्घ्रियुग्मम् ।
लोकद्वयानन्दकरं करोति
गूढाशयं राजविधानसारम् ॥
नानानिबन्धनविलोकनखेदशान्त्यै
संगृह्य धर्म्मनयमूलवचो विभाव्य ।
साग (?) निगृह्य नृपशिक्षणकौतुकाय
श्रीव्रजनाथकृतिना रचितो निबन्धः ॥
नेपालदेशाधिपकान्तिपुर्यां
गीर्वाणयुद्धोत्तरविक्रमस्य ।
राजाधिराजस्य मनःसरोजं
प्रकाशयेद्राजविधानसारः ॥

पूर्णाङ्गो धर्म्मनिष्ठो गुणगणनिपुणः शक्तिसम्पन्नसारो
नानोपायप्रकारावसरचतुरनीतिविज्ञः कलावान् ।
भूपालेन्द्रो विपक्षं तृणमिव लघयन्नीतिचर्य्याकलापै-
र्यावज्जीवं प्रमोदं बहुविनतयशो विन्दते स्वर्गमायुः ॥
तस्माद्राजानिशं सर्व्वसङ्गादि परिसाधयेत् ।
अभ्यसेद्धर्म्मनीत्यादि शासनं गुरुसेवनात् ॥ इत्यादि ।

End. फलानुमेयाः सर्व्वत्र परोक्षगुणवृत्तयः ।
तस्मात् परोक्षवृत्तीनां फलैः कर्म्मोपलक्षयेत् ॥
सुपुत्रो राज्यरक्षादिसमर्थश्च यदात्मजः ।
तदा मन्त्र्यादिसम्मत्या यौवराज्येऽभिषेचयेत् ॥

ख्यातः पण्डितराजरम्यपदवीं यो रुद्रराजेश्वरा-
दाप्तः श्रीव्रजनाथनामविदितो वेदाङ्गशास्त्रोज्ज्वलः ।
भूपानन्दिनि तत्-सुतेन रचिते नीतिप्रबन्धेऽतुले
संपूर्णो नृपधर्म्मबोधनिपुणो देतो विलासः शुभः ॥

Colophon. इति श्रीमद्भुविदन्मुकुटमणिगणकिरणनिराजितचरण-श्रीपण्डितराज-

मल्लनाथात्मज-श्रीपण्डितराज-रघुनाथसूरिविरचिते राजविलासव्यवहारे रा-
जधर्म्मकथनो नाम द्वितीयो विलासः । शुभमस्तु सर्व्वजगतामस्तु ॥

विषयः । इति " साङ्गोपाङ्गनिरूपणो नाम प्रथमो विलासः ।
,, राजधर्म्मकथनो नाम द्वितीयो विलासः ।

(१४१८ ।) रामायणनाटकम्. By धर्म्मगुप्त. 12×4 inches. Folia, 43. Lines, 9 on a page. Extent, 968 çlokas. Character, Newârî. Date, (?). Appearance, decaying. Prose and verse. Generally correct.

Beginning. ॐ नमो नाट्येश्वराय ।

नमोऽस्तु सर्व्वदेवेभ्यो द्विजातिभ्यः शुभं तथा ।
जितं धर्मेण वै राज्ञा चारोग्यं + + + + + ।
ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा ।
प्रशास्तु मां महाराजः पृथिवीं + ससागराम् ॥
राष्ट्रं पुष्प + + + + + वर्द्धताम् ।
प्रेक्षाकर्तुर्भवान् धर्म्मो भवतु ब्रह्मभावितः ॥
काव्यकर्तुर्यशश्चास्तु धर्म्मश्चापि प्रवर्द्धताम् ।
इज्यया चानया नित्यं प्रीयन्तां देवता इति ॥

ॐ नमो नृत्यनाथाय ।

ध्यानावसक्तलोचनो गिरिसुतावक्त्रं ततः सोत्सुकः
किं शम्भो तपसीति वल्लभतमा प्राहृत्य पाणौ करे ।
भ्रूभङ्गाकुलभीषणो दृढमनस्त्यक्तभीमो हसो
मोहान्तो रतिशोकयाधुवरमः शम्भुश्चिरं पातु वः ॥ (?)

.. ..
.. ..

सूत्र । प्रादिष्टोऽस्मि श्रीमतो भगवतो श्रीपादपद्मपरायणेन श्रीशिव-
नारायणचरणसेवकेन श्रीमद्भूपतीन्द्रवरेण सुरसौभाग्यवसन-
विलासनैकभाण्डारेण – – – – श्रीमता जगज्जयविजयदेवेन सभा-
सार्द्धं हरिश्चन्द्रचरणागतसौख्यप्रवर्त्तेन नानादिग्देशागतानां सभा-

सर्वो वर्त्तते। तत्रभवतः श्रीरामदासबहुश्यनन्दनस्य परमराजकवैराग्यं-
श्री + ल-सरस्वतीप्रथितकीर्त्तिमण्डलस्य श्रीमतो धर्म्मगुप्तस्याभिनवकृतं
समुरक्कुरामायणनाटकमभिनयितव्यमिति। इत्यादि।

End. (खण्डितम्।)

(१५६२।) रूपावली. By राघवराममिश्र. 10×3 inches. Folia, 16. Lines, 5 on a page. Extent, 240 slokas. Character, Nagara. Date, Saka Era, 1714. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः।

प्रणम्याऽऽदौ गणपतिं सर्व्वविघ्नविनाशनम्।
शम्भुञ्च परमात्मानं गुरुञ्च सकलार्थदम्॥
देवीं संनम्य शिरसा सर्व्वज्ञानैकदीपिनीम्।
क्रियते राघवेणादिशब्दानां रूपनिर्णयः॥

श्रीमत्साहबहादुरस्य सुमतेर्नृदेवदातुः सदा
नित्योत्साहयुतस्य भूपतिपतर्वीरस्य नित्यं मुदे।
बालानां मतिवैभवाय हि सुखोपायेन बुद्धेरियं
शुद्धाशुद्धविचारनिर्म्मलधिया धीरैश्च संशोध्यताम्॥

अथाशब्दस्यार्थः। अकारो वासुदेवः। नन्वशब्दो वासुदेववाचक
एतन्मध्ये प्रमाणम्।

अकारो वासुदेवः स्यादाकारस्तु पितामह इति। इत्यादि॥

End. वस्तुतस्त्वेतेषां पुंस्त्वमेव लिङ्गान्तरं तु विशेष्यवाचक इत्यवधेयम्॥

शरण्यो भूपानामवनिसुरसृष्टामविटपी
पटीयान् भूभारोद्वहन इति यस्य प्रसिदिशम्।
प्रसिद्धिः सिद्धा श्रीयुवनृपतिराजस्य भवनात्
मुदे तस्यैकार्थप्रकृतिरिह रूपावलिरियम्॥ (?)

Colophon. इति श्रीमद्राघवराममिश्रविरचिता रूपावली समाप्तिमगात्। श्रीशाके
१७१४ श्रीसम्वत् १८४९ श्रावण सुदि १३ रोज रामचन्द्रोपाध्याय-
लिखितम्। शुभम्।

विषयः । आगमवर्णानामर्थभेदनिरूपणम् । वर्णभेदेन तेषां निकृष्टभेदनिरूपणञ्च ॥

(६७।) ललितार्चनचन्द्रिका. By सच्चिदानन्दनाथ. 8×4 inches. Folia, 140. Lines, 10 on a page. Extent, 4,725 çlokas. Character, Nāgara. Date, (?). Appearance, old. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

अथ ललितार्चनचन्द्रिका लिख्यते ।

शिवं गुरुं गणाधीशं नत्वा श्रीपरदेवताम् ।

ललितायाः महेशायाः प्रवक्ष्येऽर्चनचन्द्रिकाम् ॥ इत्यादि ।

End. भविष्यपुराणे ।

विभवे सति यो मोहात् न कुर्य्याद्विधिविस्तरम् ।

न तत्फलमवाप्नोति – – – – – – मानसः ॥

इत्यलं विस्तरः ।

सच्चिदानन्दनाथेन सहजानन्दचेतसा ।

चन्द्रिकायां प्रणीतायां प्रकाशः + + + शकः ॥

Colophon इति श्रीसच्चिदानन्दनाथविरचितायां ललितार्चनचन्द्रिकायां नैमित्तिक-

पूजाधिकारिनिरूपणप्रबोधकं नाम पञ्चविंशः प्रकाशः समाप्तः ।

श्रीसच्चिदानन्दमुनीन्द्रवर्य्यः शिवाप्रसादाधिगता – – – ।

निरस्तसांसारिकमोहजालो नियोगतः श्रीपरदेवतायाः ॥

पीठे जालन्धराख्ये प्रथितकलपालङ्कृतः प्रार्थितः सन्

शिष्यैः संसारतप्तैः सकलसुखकरीं चन्द्रिकामाततान ।

व्याप्तां नाम्नाय लोकेऽर्चनयुतललितानामयुक्तां बुधा या-

माश्रित्याभ्यर्च्य देवीपदयुगममलं प्राप्नुयुर्धाम नित्यम् ॥

इति श्रीमदाचार्य्यानन्दनाथश्रीमत्सच्चिदानन्दनाथविरचिता ललिता-

र्चनचन्द्रिका समाप्ता । शुभमस्तु ॥

विषयः । इति० प्रातर्निष्क्रमणविधिर्नाम प्रथमः प्रकाशः ।

„ मानिस्नानविधिः । २ ।

„ सन्ध्यावन्दनप्रबोधकः । ३ ।

„ सूर्य्यार्घ्यदानप्रबोधकः । ४ ।

इति० द्वारपूजादिविधिप्रबोधकः । ५ ।

,, पूजाप्रारम्भप्रबोधकः । ६ ।

,, भूतशुद्धिप्राणप्रतिष्ठाप्रबोधकः । ७ ।

,, मातृकान्यासप्रबोधकः । ८ ।

,, षट्त्रिंशत्तत्त्वन्यासप्र धकः । ९ ।

,, १० ।

,, ११ ।

,, श्रीचक्रन्यासप्रबोधकः । १२ ।

,, करशुद्धिप्रबोधकः । १३ ।

,, मूलविद्याप्रबोधकः । १४ ।

,, महापादुकान्यासप्रबोधकः । १५ ।

,, मुद्राविचारणादिप्रबोधकः । १६ ।

,, पात्रासादनप्रबोधकः । १७ ।

,, आत्मपूजावृत्तायजनपस्थापनपूजाप्रबोधकः । १८ ।

,, १९ ।

,, २० ।

,, २१ ।

,, २२ ।

,, २३ ।

,, समयाचारबोधकः । २४ ।

,, नैमित्तिकपूजाधिकारिनिरूपणप्रबोधकः । २५ ।

---

(२)२३१ ।) वाक्यसुधाटीका. By ब्रह्मानन्दभारती. 12×4 inches. Folia, 13. Lines 20 on a page. Extent, 780 ç1okas. Character, Nāgara Date, (?). Appearance, decaying. Prose and verse. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः । श्रीदक्षिणामूर्तये नमः ।

यस्मात् सर्वं समुत्पन्नं चराचरमिदं जगत् ।

इदं नमो नटेशाय तस्मै कारुण्यरूपिणे ॥

कारणं चादि (?) समस्तां कारणार्थमनामयम् ।

कारणानन्तमात्मानमद्वयं समुपास्महे ॥

.. ..

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।

मया वाक्यसुधाटीका यथामति विरच्यते ॥

न ख्यातिलाभपूजेच्छा टीकाकरणकारणम् ।

न चिरस्तावलं चात्र मुक्तिरेवात्र कारणम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्ति......परमकृपानिधिश्रीभारती-तीर्थगुरुः प्रकरणप्रतिपाद्यमर्थं प्रथमश्लोकेन तावद् दर्शयति । रूपं दृश्यं इत्यादि । इत्यादि ।

End. अतएव मोक्षशास्त्रस्यापि साफल्यं स्यादित्ययमेतस्य प्रकरणस्य समस्त-वेदान्तशास्त्रस्य च महातात्पर्यार्थ...तस्मात् सर्व्वमनवद्यमिति ।

Colophon. इति श्रीमत्-परमहंसपरिव्राजकाचार्य्य-श्रीमदानन्दभारतीमुनिवर्य्यशिष्य-ब्रह्मानन्दभारतीयतिप्रणीता वाक्यसुधाटीका समाप्ता । ... ॥

(१३११ ।) विद्याप्रदीपिकाविवृतिः. 11 x 4 inches. Folia, 45. Lines, 9 on a page. Extent, 959 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

वन्दे साम्बं सदानन्दमानन्दावरणापहम् ।

तत्त्वावबोधसन्मार्गाय महादेवं कृताकृतिम् ॥

श्रीमद्भगवत्पूर्णाद्वैतवेदान्तसिद्धान्तविद्याचार्यशिरोमणि-श्रीमद्भग-वत्तारभगवच्छङ्कराचार्यचरणानुग्रहविद्यासपरापरात्मतत्त्वः श्रीपद्मपादा-चार्यकस्त्वागुरुध्यानसाधनं मङ्गलं शिष्यशिक्षार्थं कर्तव्यत्वप्रकरणोक्तमेव निबध्नाति । ब्रह्मभिरिति ।

ब्रह्मभिः प्रतिपाद्यं यद् ब्रह्मभिर्ब्रह्मसंयुतैः ।

चिन्तितं कर्मनिर्मुक्तं तद् ब्रह्म भुवि भावये ॥ इत्यादि ।

End. आचार्य्यानुग्रहादेव सूक्ता विज्ञानदीपिका ।
चिद्रूपपद्मपादाचार्य्यैर्व्याख्यामुख्येन कृतैः ॥ (८)

आचार्य्याणां शङ्करादीनां . . . . . . । इति मन्मार्गप्रवर्त्तका आचार्य्याः शङ्करादिनुमन्यान(?)कर्त्तं स्वमुखेन स्वशिष्यद्वारा वा निबन्धनान्ते समारोपयन्तीति भावः ।

Colophon. इति श्रीशङ्कराचार्य्यप्रशिष्यपरमेश्वरपद्मपादाचार्य्यविरचितविज्ञानदीपिकाविवृतिः समाप्ता ॥

---

(२)४५१) वीरमित्रोदयः (व्यवहारकाण्डः). By मित्रमिश्र. 21 × ... inches. Folia, 363. Lines, 16 on a page. Extent, 10,890 ślokas. Character, Nagara. Date, Saṃvat 1876. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः । श्रीमद्विश्वनाथगुरुचरणेभ्यो नमः ।

पुरतः प्रविलोक्य मर्गचापं
परतः कामपि कामकार्मुकज्याम् ।
पुलकाञ्चितपीतबाहुदण्डः
कुशलं नः कुरुतात् रघुप्रकाण्डः ॥

अस्ति श्रीयुतवीरसिंहनृपतेराज्ञावशाद्भूतमुक्तः
श्रीमित्राभिधपण्डितः प्रतिदिशं कीर्त्यानिशं मण्डित ।
नानानिर्णयवर्णनव्यसनिनां संख्यावतां प्रीतिदं
संप्राप्तव्यवहारसाधकमिमं कुर्व्वे प्रकाशं परम् ॥

.. ..

.. ..

परिभाषा परिष्कारः प्रमाणानां निरूपणम् ।
विवादपदनिर्द्देशः प्रकीर्णकविवेचनम् ॥
एवं प्रकरणान्यत्र चत्वारि प्रथमे पुनः ।
लक्षणं व्यवहारस्य निरुक्तिर्मुनिभाषिता ॥ ५ ।
व्यवहारस्य भेदाश्च स्वलक्षणविलक्षणाः ।
सामान्यतो विशेषाच्च परिभाषाप्रकाशनम् ।

सामान्यपरिभाषायां धर्माधिकरणे सताम् ॥ ६ ।
उत्थाने व्यवहारस्य राज्ञो विधिविवेचनम् ।
प्राड्विवाकस्वरूपञ्च सभापतिसभासदाम् ॥ ७ ।
निरूप च सभ्यानां सर्वोक्तिकबलाबलम् ।
केषाञ्चिद् सभ्यभिन्नानामपि स्थानं सभास्थले ॥ ८ ।
तत्र प्रयोजनसादेयानादेयव्यवहारयोः ।
विवेचनमथो कार्यं सदुद्धृकसभापतेः ।
प्रतिज्ञोत्तरहेतूनां पदानां भिन्नशालिनाम् ॥ ९ ।
निरूपणमसदुद्धृतावदुष्टौ च सभापतेः ।
सदुद्धृकस्य शास्तिः सम्यग् दृष्टौ फलाभिधा ॥ १० ।
विशेषपरिभाषायां प्रत्यर्थ्यर्थार्थनिर्णयः ।
निह्नवादौ विधिस्तत्र निह्नवादिविवेचनम् ॥ ११ ।
विलम्बोत्तरदानञ्च क्वचिन्नैव विलम्बनम् ।
स्यादौ प्रकरणे त्वर्थो विविच्यन्ते क्रमादमी ॥ १२ ।
उपोद्घातप्रकरणैरन्येऽपि सदनुव्रताः ।
दैवीयेषु तु साक्ष्यादिलक्षणं तत्र साक्षिणः ॥ १३ ।
असाक्षिकस्तत्र हेतुः साक्षिप्रश्नविधिस्ततः ।
तत्र द्वैधे निर्णयः कोटे(?) साक्ष्ये क्वचिद्दोषता ॥ १४ ।
निर्णयो लिखितस्यापि तद्भेदास्तत्परीक्षणम् ।
साक्षित्वं लिखितस्यापि प्रत्यक्षेण प्रमाणता ॥ १५ ।
युक्तिर्विशेषशास्त्रस्था अर्थापत्त्यनुमानता ।
लौकिकानां प्रमाणानामभावे दिव्यभावना ॥ १६ ।
दिव्यभेदास्तदावश्या देशकालाधिकारिणः ।
तन्मातृका तद्विधयविधयो विविधाः क्रमाः ॥ १७ ।
शेषमपि च शब्दोऽनुमानत्वेन मानता ।
एतदर्थं विनियन्त्येषां तात्तीयीके ततः क्रमात् ॥ १८ ।
व्यवहारपदान्यष्टादश्यो विप्राणि लक्षणम् ।
तेषां सामान्यतः सर्वभेदानां विविधा विधाः ॥ १९ ।

एतेऽर्थाः सम्प्रयुज्यन्ते तुरीये तु प्रकीर्णके ।

यन्नोक्तमुपयुक्तं तद्विविच्य प्रतिपाद्यते ॥ २० ॥

अथ कोऽयं व्यवहारः ॥ इत्यादि ॥

End. एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।

यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथाक्षयः ॥

Colophon. इति श्रीप्रकीर्णकाख्यं चतुर्थं प्रकरणं समाप्तम् । इति श्रीमत्सकल-सामन्तचक्रचूडामणि . . . . महाराजाधिराजप्रतापरुद्रतनूज-श्रीमन्महाराजाधिराजरुद्रमहादेवात्मज-श्रीमन्महाराजाधिराज ... श्रीवीरसिंहदेवोद्-याजितश्रीहंसपण्डिततनूज-श्रीपद्मनाभमिश्रसून् . . . श्रीमन्मिश्र-मिश्रकृते वीरसिंहावलोकाभिधानके व्यवहारप्रकाशः पूर्त्तिम – – ॥ इति श्रीव्यवहारकाण्डं समाप्तम् ॥ शुभमस्तु । सम्वत् १८०६ ।

(१३१२ ।) व्यवहारप्रदीपः. By कृष्ण. 13×3 inches. Folia, 14. Lines, 5 on a page. Extent, 210 çlokas. Character, Newari. Date, (?). Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमो देव्यै ।

नत्वा शम्भुं सगौरीकं सगणाधिपमीश्वरम् ।

यत्प्रसादेन + क्षिप्रं वाञ्छितं लभते नरः ॥

व्यवहारप्रदीपोऽयं कृतः कृष्णेन यत्नतः ।

कौतुकाय सतां ते तु क्षाम्यन्तु मम धृष्टताम् ॥

ज्योतिषे मन्त्रसारे तु सिद्धान्ते वैद्यके तथा ।

अर्थमात्रन्तु गृह्णीयाच्छब्दं विचारयेत् ॥

अथ प्रथमं ग्रहावस्थानम् ।

मासं राशौ वसेत् भानुश्चन्द्रः सार्द्धं दिनद्वयम् ।

मङ्गलः सार्द्धमासन्तु मासैकन्तु बुधस्तथा ॥ इत्यादि ।

End. अर्कः शौरिः कुजः शौरिः प्रथमस्थाः प्रसूयते ।

पितृमातृ तथा भ्रातृ आत्मजा जायते शिशुः ॥ (?)

Colophon. इति व्यवहारप्रदीपपुस्तकं समाप्तम् ॥

विषयः । ग्रहावस्थानम् । ताराचन्द्रगुणविह्नसुखः । योगानां शुभाशुभम् । ग्रहाणां शुभाशुभकथनम् । कर्णवेध – विद्यारम्भ – चूडाकरण – उपनयन – विवाहानां – तिथिनक्षत्रयोगकथनम् । गोधूलिकाव्यवस्था । यात्रा-निरूपणम् । ग्रहाणामन्तर्दशानिरूपणम् । पितृमातृभ्रातृजन्मकोष्ठ-कथनम् ॥

(११९०।) शिशुपालवधटीका (निर्णयबृहस्पतिनाम्नी) By बृहस्पति. 14×4 inches. Folia, 133. Lines, 10 on a page. Extent, 4,156 çlokas. Character, Newāri. Date, Newār Era, 829. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ गणेशाय नमः ।

निःशेषवाङ्मयकलापकल्पवल्ली
मोहान्धकारहरणार्कमरीचिमाला ।
उज्ज्वलचित्तमनसात्रमवाग्गुरोर्वे-
वक्त्राम्बुजे भगवती मम विजृम्भताम् ॥
– – – भवसकुठारः कृन्तति संसारशाखिनो मूलम् ।
सा मम सकलमभीष्टं भवयतु सहसैव वैष्णवी माया ॥
यः कैटभारिचरणहृदयपद्मभृङ्गो – – – – – – ।
– – – – – सोऽपि च द्वयधर्मनिबंधकुशुरोऽभूत् ॥
सन्दर्भशुद्धिमधिगम्य गिरां गुरोर्यः
श्रीश्रीधरादिद्द्यतमिश्रपदः – – ।
गौडाधिपाहुपचितप्रवरप्रतिष्ठो
धीमान् बृहस्पतिरितिप्रथिताभिधानः ॥
सोऽहं समस्तगुणदोषविचारचारु-
चेतः प्रबोधविषये सुधियां सुबोधम् ।
दुर्बोधपद्यशिशुपालवधप्रकाशं
निर्मामि निर्णयबृहस्पतिनामधेयम् ॥ इत्यादि ।

End. इति महिन्तापनीयश्रीकविचक्रवर्तिबृहस्पतिकृतनिर्णयबृहस्पतिनाम मा-घटीकायां षष्ठः सर्गः ॥

नेपालाब्दे ग्रहकरगजैरङ्किते पौषमासे
शुक्ले पक्षे प्रतिपदि तिथौ वृद्धियोगान्वितायाम् ।
पूर्व्वाषाढायुतगुरुदिने प्रालिखद् ब्रह्मदेवो
भूमीदेवो गुरुमुखमिता साधकाख्यस्य टीका ॥

(१५०० ।) शुद्धदीपिका. By दुर्गदत्त. 10 × 4 inches. Folia, 10. Lines, 9 on a page. Extent, 180 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

Beginning. ॐ नमो ब्रह्मणे नमः ।

नवनीतमिव दध्नः समुद्धृत्य सारमागमात् ।
प्रवक्ष्यामि मायोक्त्या गुरुपदेशलेशतः ॥
सन्ध्यावन्दनपूर्व्विका गायत्र्या शुद्धदीपिका । ?
श्रीमता दुर्गदत्तेन क्रियते प्रयसे सताम् ॥

ततो ब्राह्मे मुहूर्ते चोत्थाय शुचिः समाहितः सुधीः प्रातःस्नानादि स्वयाज्ञिक ? प्रोक्तमार्गेणाह्निकं निर्व्वर्त्य चन्दनमृत्तिकादिनोर्द्ध्वपुण्ड्रं विदध्यात् ॥ इत्यादि ।

End. अर्घ्यदानेऽञ्जलित्रयप्रक्षेपोऽस्तु आचमनात् प्राक् कर्त्तव्यः । .. .. उत्तरे शिखरे + + + पूर्व्ववद् विसर्जयेत् ॥

Colophon. इति गायत्र्या शुद्धदीपिकायां सन्ध्यावन्दनादिविधिः समाप्तः ॥ शुभमस्तु सर्व्वजगताम् ॥

---

(२)२६६ ।) श्रीमतोत्तरतन्त्रम्. 16 × 6½ inches. Folia, 263, (leaves 5 to 13 are missing) Lines, 9 on a page. Extent, 6,426 çlokas. Character, Nāgara. Date, Samvat 1893. Appearance, fresh. Verse. Incorrect.

Beginning. श्रीगुरुगणपतये नमः ।

सर्व्वेषां तत्त्वतो व्यापी तत्वाकृष्टस्तु मायया ।
माययोत्तरसंलीनो प्रकाशयति भास्करः ॥

श्रीमच्चन्द्रपुरे रम्ये नानारत्नविभूषिते ।
नानाद्रुमलताकीर्णे नानापक्षिगणान्विते ॥

.. ..

.. ..

दिव्यं मनोहरं रम्यं श्रीमच्चन्द्रपुरं शुभम् ।
समुद्रस्योपकण्ठे तु हेमप्राकारमण्डितम् ॥
योजनायुतविस्तीर्णं नानारत्नोपशोभितम् ।
नानाहर्म्याणि दिव्यानि नानारत्नमयानि च ॥

.. ..

तत्र मध्ये रम्या शतयोजनविस्तरा ।
शुद्धस्फटिकसङ्काशा सर्वरत्नोपशोभिता ॥
योगिन्यौघसमेतस्मिन् नानाकोलाहलैः रवैः । ?
चक्रैश्च विविधाकारैर्नानाविधि — — पशुभिः ॥

.. ..

केचित् स्तुवन्ति देवेशं केचित् पठन्ति भाविताः ।
केचित् किलिकिलायन्ते गर्जन्ति चोत्पतन्ति च ॥
क्रीडन्ति कलकलारावैः परमानन्दनन्दिताः ।
तत्रस्थं भैरवं देवं परमानन्दनिर्भरम् ॥
क्रीडाविनोदैरसिलालसस्थं
सच्छुद्धचित्तात्मनि तन्मयुक्तम् ।
कामैर्विलासैरतिरागवन्तं
तं प्रेक्ष्य देवी प्रणिपत्य चादरात् ॥
प्रोत्फुल्लनयना देवी परानन्दाकुलेक्षणा ।
प्रणिपत्य पुनः देवी स्तोत्रमेतदुवाच ह ॥

श्रीदेव्युवाच ।

नित्यानन्दं परं शान्तं निष्कलङ्कं निरामयम् ।
ओमातीतं परं शून्यं भैरवं तं नमाम्यहम् ॥

.. ..

.. ..

एवं देव्या स्तुतं शम्भुं परानन्दाकुलेक्षणम् ।
भैरवो हृष्टमनसा प्रीतः फुल्लकमलाननः ॥
प्रसन्नवदनो देवो वाक्यं चेदमुवाच ह ।
साधु साधु महाभागे तुष्टोऽहं भक्तिवत्सले ॥
पृच्छ पृच्छ यथाकामं यत्ते मनसि वर्त्तते ।
तत् सर्वं कथयिष्यामि स्तवनानेन तोषितः ॥
इति श्रुत्वा शुभं वाक्यं भैरवस्य महात्मनः ।
प्रणिपत्य महादेवी चेदं वचनमब्रवीत् ॥

श्रीकुब्जिकोवाच ।

आमितार्हं त्वया नाथ अनेकैः शास्त्रकोटिभिः ।
तन्त्रैश्च विविधाकारैः पञ्चस्रोतात्मकैस्तथा ॥
नित्यातन्त्रादिभिश्चैव — — — — — — — ।
श्रीमतं च न मे ज्ञातं भ्रान्ति — —पदे पदे ॥

.. .

अल्पप्रज्ञात्वहं नाथ ज्ञातुं वक्तुं न शक्यते ।
गोपितं तु त्वया देव श्रीमतेदं मतोत्तरम् ॥

.. ..

एतत् सर्व्वं समाख्याहि जानीमो निश्चयं यथा ।
कथयस्व प्रसादेन भक्ताहं तव वल्लभा ॥ इत्यादि ।

End. तन्त्रसारमिदं गुह्यं रहस्यं सुसिद्धिदम् ।
भुक्तिदं मुक्तिदं देवि सर्व्वसंशयछेदकम् ॥

.. ..

सर्व्वकामानवाप्नोति सर्व्वसिद्धिफलं लभेत् ।
पूजनात् तन्त्रसारस्य लभते शाश्वतं पदम् ॥
त्रिकोणं मण्डलं कृत्वा तन्त्रसारं प्रपूजयेत् ।
पूजनात् सिद्धिमाप्नोति तुष्यन्ति च मरीचयः ॥

Colophon. इति श्रीमतोत्तरे श्रीकण्ठनाथावतारिते श्रीचन्द्रद्वीपविनिर्गते योगिनी-
गुह्ये विद्यापीठे श्रीमतसारगर्भनिर्णये श्रीचतुर्विंशतिसाहस्रसंहितायां
सारसमुच्चये श्रीमतोत्तरे पञ्चविंशतितमः पटलः समाप्तः ।
संवत् १८९३ ।

विषयः । ... श्रीमतोत्तरमहामन्थाने प्रथमः पटलः सम्पूर्णम् ।
इति मतोत्तरे श्रीकण्ठनाथावतारिते चन्द्रद्वीपनिर्गमे विद्यापीठे योगि-
नीगुह्ये कुमारिकाखण्डे विमलप्रभुप्रश्नवर्णनं नाम । २ ।
इति० क्षेत्रोपक्षेत्रसन्दोहोत्पत्तिः । ३ ।
,, मातराणां ? प्रतिष्ठालक्षणनिर्णयो नाम । ४ ।
,, ५ ।
,, मालिन्याग(?)चक्रप्रस्तारनिर्णयो नाम । ६ ।
,, ७ ।
,, मुद्राधिकारनिर्णयो नाम । ८ ।
,, श्रृङ्गचक्रहृद्दूतीनिर्णयो नाम । ९ ।
,, १० ।
,, शिखास्वच्छन्दनिर्णयो नाम । ११ । १२ ।
,, श्राद्धाधिकारो नाम । १३ ।
,, लोकद्वादशनिर्णयो नाम । १४ ।
,, देवीचक्रनिर्णयो नाम । १५ ।
,, द्वितीयचक्रनिर्णयो नाम । १६ ।
,, गुह्यमातृचक्रनिर्णयो नाम । १७ ।
,, योगिनीचक्रनिर्णयो नाम । १८ ।
,, कालज्ञानचक्रनिर्णयो नाम । १९ ।
,, २० ।
,, समस्तविद्यानिर्णयो नाम । २१ ।
,, षोढान्यासनिर्णयो नाम । २२ ।
,, होमार्थं चारुलक्षण-श्रृङ्गमध्यकृत्योगिनीचक्रारम्भरचनाधिकारो
नाम । (?) २३ ।
,, षड्रसताह्निर्णयो नाम । २४ ।
,, २५ ।

(१४२८ ।) श्लोकसारसङ्ग्रहः. By जगज्ज्योतिर्मल्ल. 10×5 inches. Folia, 87. Lines, 9 on a page. Extent, 1,810 çlokas. Character, Newāri. Date, Newār Era, 808 Appearance, fresh. Verse. Generally correct.

Beginning.

ॐ नमः श्रीभवानीशङ्कराभ्याम् ।

एतद् ब्रह्माण्डभाण्डं हरिहरविधयः सन्त्यरन्तीह सर्व्वं

कीटान् भूपान् समस्तान् तृणमपि सततं तारयन्ते निसर्व्वम् ।

एतेषां त्राणकर्त्री हरिहरहृदये या वसन्तीह शक्तिः

सा मे कल्याणदात्री भवतु भयहरा चण्डिका सुप्रसन्ना ॥

शिवं कल्याणमुच्यते शक्तिः सामर्थ्यमुच्यते ।

तयोरभेदमात्रेण शिवशक्तिः प्रयुज्यते ॥

अथ वाराणसाष्टकम् ॥ इत्यादि ॥

End.

नानाकविकृते श्लोके भावार्थो नैव गोचरः ।

गुणदोषौ यदि स्यातां सुधीभिस्तद् विचार्य्यताम् ॥

Colophon. इति श्रीश्रीजगज्ज्योतिर्मल्लकृते श्लोकसारसङ्ग्रहे वैराग्यवर्णनानां द्विसप्ततिश्लोकसङ्ग्रहस्त्रयस्त्रिंशत् ॥

याते नेपालिकाब्दे रसयुगवसुभिः संप्रयुक्तेऽथ माघे

पञ्चम्यां शुक्लपक्षे दिनकरदिवसे पौष्णमे साध्ययोगे ।

भूपानां वन्दनीयः सकलगुणनिधिः श्रीजगज्ज्योतिमल्लो

नानाभेदप्रयत्नाद् रघुकुलतिलको ग्रन्थमेतच्चकार ॥

.. ..

.. ..

श्रीश्रीजगज्ज्योतिमहीपमल्लचिन्तामणेर्भक्तपुरे मनोज्ञे ।

आज्ञां समादाय लिलेख पुस्तं दैवज्ञनारायणसिंहनामा ॥

श्रीभवानी प्रीणातु । श्रीश्रीसुमतिजयजितामित्रमल्लदेवसन स्व पुस्तक दरवारयाक थंगलदाम्भगुलिहुकाम्यं तया जुरो ॥ भागिरामपरमानया वेलस ।

संवत् ८०८ श्रावण वदि २३ । शुभमस्तु ॥

(१)२११ ।) सङ्गीतचन्द्र. 14×4 inches. Folia, 215. Lines, 8 on a page. Extent, 5,805 ślokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ भवानीशङ्कराभ्यां नमः ।

नत्वा गुरुं गुणवरं भरतञ्च नत्वा
नत्वा ततो गुणतमं गिरिजाधिनाथम् ।
वागीश्वरीं भगवतीं बहुशोऽपि नत्वा
सङ्गीतचन्द्रकरणाय करोमि यत्नम् ॥
विश्वं व्याहरणकृमात्मकमिदं यस्याङ्गिकं वाङ्मयं
सर्वं वाचिकमिन्दुसूर्य्यभगणाद्याहार्य्यमार्य्या तनुः ।
लीलामात्रकृताखिलत्रिभुवनो यः केवलं सात्त्विको
चन्द्रश्रीकृतसव्यभागसुभगो भूयात्स वः श्रेयसे ॥ (?)

(ततो भाषा ।)

सम्पर्थितः सह सुरैः सुरनायकेन
वेदेभ्य एव समसृजत नाट्यवेदम् ।
धाता ददौ तदपि भरताय सोऽपि
शेषं विशेषमथ तद्गिरीन्द्रजाभ्यां ॥

(ततो भाषा ।)

तत् ताण्डवाख्यमथ लास्यमिति प्रसिद्धं
सर्वं ममान्निजसुतेषु तथाप्सरःसु ।
तेभ्यो मुरारिमथिता जगदुन्नताय
नाट्यं विदग्धजनराजकुमारिकाद्याः ॥

.. ..

एवं परम्पराप्राप्तनाट्यवेदार्थसङ्ग्रहः ।
क्रियते कुमिलाख्येन विदग्धजनवीथिका ॥

.. ..

.. ..

निर्मीयतां नाट्यभावाया यत्नाः पूजाविधिक्रमः ।
उमापतिजयपद यदयत्र यथाक्रमम् ॥

सभायाः सन्निवेशश्च पूर्व्वरङ्गार्थवर्णनम् ।
ततश्च पूर्व्वरङ्गाङ्गप्रत्याहारादिवर्णनम् ॥
नान्दीश्लोकप्रपञ्चश्च प्रयोजनवर्णनम् ॥(१)
ततः प्रवेशः पात्रस्य ततोऽभिनयलक्षणम् ॥
वृत्तिस्वरूपकथनं नृत्यभेदनिरूपणम् ।
अङ्गप्रत्यङ्गयोर्लक्ष्म तथोपाङ्गनिरूपणम् ॥
अङ्गानि च शिरो हस्तौ उरः पार्श्वं कटीतटम् ।
चरणौ च तथा स्कन्धौ प्रत्यङ्गानि ततः परम् ॥
ग्रीवा करौ पृष्ठमथोदरमूरू सजङ्घिकौ ।
जानुनी मणिबन्धौ च भूषणानि ततः परम् ॥
दृष्टिस्तारः — —भ्रूश्च नासिका नासिकानिलः ।
कपोलावधरौ दन्ता रसना चिबुकं मुखम् ॥
मुख — —च कथितौ पार्ष्णी गुल्फौ ततः परम् ।
अङ्गुल्यश्च स्तनावेवं स्वरूपाङ्गान्यनुक्रमात् ॥
प्रचारो हस्तयोश्चैव हस्तयाः करणान्यपि ।
हस्तकर्म्माणि संख्याणि हस्तयोः स्थानकानि च ॥
चार्य्यश्च द्विविधास्तद्वत् करणानि द्विधा पुनः ।
मण्डलानि द्विधा भौमाकाशिकत्वविशेषतः ॥
न्यायाश्चतुर्विधास्तद्वदङ्गहाराः सरेचकाः ।
ततो भावास्तद्विशेषाः स्थायिनश्च ततो रसाः ॥
तस्यांशकाश्च निर्वेदस्तम्भाद्या व्यभिचारिणः ।
अथ प्रकीर्णकं तत्र प्रागुपाध्यायलक्षणम् ॥
आचार्य्यलक्षणञ्चैव प्रमारम्भस्ततः परम् ।
पात्राणां लक्षणं सम्यक् ततः पात्रगुणास्ततः ॥
ततोत्तमस्य पात्रस्य पात्रदोषनिरूपणम् ।
पात्रालङ्करणं देशीलास्याङ्गानां प्रकाशनम् ॥
पेरणीलक्षणं पश्चान्नटनर्त्तकलक्षणम् ।
देशीनृत्यक्रमः पश्चात् पेरणीपद्धतिस्ततः ॥

ततश्च गोच्छ्लीलाश्च पर्य्यन्ते गोच्छ्लीतिविधिः ।
इति नृत्यप्रकाशेऽस्मिन् अध्याया दर्शिताः क्रमात् ॥
(ततो भाषा ।) इत्यादि ।

End. यथा यथा प्रेक्षकानां चमत्कारस्तथा तथा ।
रतिमुत्पादयेन्नृत्य इति सङ्गीतकल्पद्रुमः ॥
(ततो भाषा ।)
नास्त्येव तत् किमपि यन्न गुणानुविद्धं
तद्दुर्लभं यदिह दोषविवर्जितं स्यात् ।
आख्याय्यभिज्ञहृदयं (?) गणना न किं स्यात्
प्रत्यर्पणाभिनीतिरथापि चेन्न दोषः ॥
(ततो भाषा ।)

.. ..

Colophon. इति सङ्गीतकल्पद्रुमनामा ग्रन्थः समाप्तः ।
सन्ति यद्यपि भूयांसो ग्रन्थाः सङ्गीतगोचराः ।
तथापीदृशमन्यत्तु नास्तीति परिचिन्तयन् ॥
पीयूषहरकं तासां यत्नाद् विचिन्तवान् यथा ।
तथैतत् पुस्तकं श्लाघ्यं दूराद् दर्शितवेदसः ॥
चकार नृपश्रेष्ठः श्रीजगज्ज्योतिरोजिता ॥

.. ..

.. ..

---

(७)२२१ ।) सङ्गीतभास्करः. By जगज्ज्योतिर्मल्ल. 14×4 inches. Folia, 192. Lines, 8 on a page. Extent, 5,384 çlokas. Character, Newāri. Date, Newār Era, 751. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीसर्वेशाय नमः ।
अज्ञानतिमिरविनाशकरमानन्दसुधाकमुद्भूर्वकुम् ।
तापत्रयापहरणं वन्दे परदैवताचरणम् ॥
नत्वा गुरुमतिसुधन् कृतो जगज्ज्योतिरवनीशः ।
सङ्गीतभास्करमिदं कुरुते रुचिरं मनीष सङ्गीतविदः ॥

नाट्यशास्त्रारम्भे निर्विघ्नसमाप्त्यर्थं शिष्टाचारपरम्पराप्राप्तकर्त्तव्यताकमेत-च्छास्त्रप्रवर्त्तकचतुर्मुखशिवेष्टदेवताकीर्त्तनरूपं मङ्गलमाचरति ग्रन्थकारः विश्वमित्यादि । इत्यादि ।

End. श्रीमज्जगज्ज्योतिरधीश्वरस्य निदेशमासाद्य गुणोत्तरस्य ।
सङ्गीतशास्त्रस्य चकार टीकां श्रीरत्नपालो वङ्कमणिर्मनोज्ञाम् ॥
सुधियोऽपि हि नन्दन्ति जल्पितैर्बालकल्पितैः ।
तदेव परितोषाय विदुषां मे समुद्यमः ॥
नेपालाब्दे शशिशरमुनिव्यञ्जिते शुक्लपक्ष
.. .. ।
.. ..
सङ्गीताख्यं समलिखदसौ भास्करं निम इन्दुः ॥

विषयः । सङ्गीतचन्द्रनामकसङ्गीतशास्त्रस्य व्याख्यानम् ॥

(१४७८ ।) सङ्गीतसारसङ्ग्रहः. By जगज्ज्योतिर्मल्ल. 10 x 5 inches. Folia, 72. Lines, 9 on a page. Extent, 1,539 çlokas. Character, Newāri. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ भवानीशङ्करगणपतिभ्यो नमः ।
उद्गच्छत्पुलकाङ्कुरः स्मितमुखः श्रुत्वा लयं मङ्गलं
गौरीलोचनचञ्चलाञ्चलमिलत्तारो विवाहोत्सवे ।
यः पाणिग्रहणच्छलेन कुरुते तस्याः कराकर्षणं
प्रोद्यद्भालसुधाकरः स भगवानस्तु प्रसन्नः सताम् ॥
पताकस्त्रिपताकश्च कर्त्तरीमुख एव च ।
अरालश्चार्द्धचन्द्रश्च कपित्थः कटकामुखः ॥
पद्मकोषः सर्पशिराः सूचिवत् कोलपल्लवः ।
मृगशीर्षा हंसपक्षो हंसास्यो भ्रमरस्तथा ॥
ऊर्णनाभश्च सन्दंशश्चतुरो मुकुलस्तथा ।
ताम्रचूड इति प्रोक्ताश्चतुर्विंशति (?) हस्तकाः ॥ इत्यादि ।

End. सकलपद्यमिति नाटकसूत्रं
यत् कृतन्तु भरतेन तत्कृतम् ।
तत्तु पूर्णमिह नैव दृश्यते
वर्त्तते किमधवा न वा नु यत् ॥
यत् स्वदृष्टमथ यच्छ्रुतं च यद् विप्रशापभरतोक्तिसद्म यत् ।
आवयेयसतमाखिलाच्च यत् मज्जुहाद् विविधपुस्तकाच्च यत् ॥
यत्तु सर्व्वमतसम्मतमेतत् सद् गृहीतमधिकं क्वापि किञ्चित् ।
कल्पना तु न मया कृता यतः किन्तु पद्यपरिवर्त्तनं कृतम् ॥
याते नेपालिकाब्दे रसयुगमुनिभिः संप्रयुक्तेऽथ माघे
पक्षम्यां शुक्लपक्षे हिमकरदिवसे पौष्णभे साध्ययोगे ।
भूपानां वन्दनीयः सकलगुणनिधिः श्रीजगज्ज्योतिमल्लो
नानामेशप्रपत्नाद् रघुकुलतिलको ग्रन्थमेतच्चकार ॥

.. ..

.. ..

रेखाः पुष्करसंख्यका गुणितमात्राणापि नाहं क्वचित्
सङ्गीतं भरतोदितेऽपि विविधं व्याख्याविनामासते ।
नानातालनिबन्धग्रन्थरचितं तत्वं न जानाम्यहं
तत्पद्मं तव पादपूर्णीकरणे मग्नं सदा चास्तु मे ॥
लोकानां परिहासस्य भक्त्या न च लज्जया ।
न लाभेन न लोभेन भाषायां विनिवेदये ॥
श्रीमज्जगज्ज्योतिर्मल्लभूपतिहृदये ।
सिंहपेयसुवेनाथं विवेन लिखितो मुदा ॥

Colophon. इति सङ्गीतसारसङ्ग्रहपुस्तकं परिपूर्णम् । शुभमस्तु सर्व्वदा ।

---

(२)११२।) संग्रामविधिः. 12×5 inches. Folia, 12. Lines, 5 on a page. Extent, 65 çlokas. Character, Nâgara. Date, (?). Appearance, fresh. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः । अथ संग्रामविधिः ।
प्रथमं नियमे चात्र शुभलक्षणयुतो भवेत् ।
सपुत्रभ्रातृसंयुक्तो देवविप्रान् प्रपूजयेत् ॥

सेनपातस्य नाम्ना च अग्निं दद्याद् दिशो दश ।

अस्त्राणि चापि संपूज्य रक्षामन्त्रं जपेन्नरः ॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।

घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ इत्यादि ।

End — स एष जीवन् खलु संपरेतो

वर्त्तेत योऽत्यन्तनृशंसितेन ।

देहे मृते तं मनुजाः शपन्ति

गन्ता नमोऽन्धं अनमानिनो ध्रुवम् ॥

Colophon. इति श्रीसंग्रामविधिः समाप्तः ॥

विषयः । इति रक्षामन्त्रः । अथार्जुननामानि । अथ संग्रामविधिः । पत्ति-प्रमाणम् । इत्यक्षौहिणीसंख्या । अथ महाक्षौहिणी । अथ व्यूहविधिः ।

(८१६ ।) सारसङ्ग्रहः. By इन्द्रसेन or इन्द्रसेन. 6×3 inches. Folia, 22. Lines, 5 on a page. Extent, 220 çlokas. Character, Nāgara. Date, Saka Era, 1731. Appearance, fresh. Incorrect.

Beginning. ॐ स्वस्ति श्रीगणेशाय नमः । श्रीसूर्य्याय नमः ।

श्रीमत्सूर्यं नमस्कृत्य रेवतं (?) तुरगाधिपम् ।

श्रीमत्सेन्द्रसेनेन क्रियते सारसङ्ग्रहः ॥

उद्धृत्य शालिहोत्राणि बालानां + + हेतवे ।

मन्दरेन्द्रेन्दुसेनेन क्रियते सुगमो विधिः ॥

सन्तः शृण्वन्तु मे वाचो यतस्ते ज्ञानभूषणः ॥ इत्यादि ।

End. औषध्या एता मया वाहानामनुभूय संप्रदाश तावमयो – – हये ॥ ?

Colophon. इति श्रीरूपनारायणेत्यादि-महाराजाधिराज-श्रीम – – – – कृतो सारसङ्ग्रहशालिहोत्रः समाप्तः । शुभम् । श्रीशाके १७३१ श्रीसंवत् १८४९ आषाढे कृष्णपक्षस्य सप्तम्यां भौमवासरे नक्षत्र २७ योगे ।

विषयः । इति रूपनारायणेत्यादिमहाराजाधिराजश्रीम – – सेनकृतो सार-सङ्ग्रहे अश्वप्रशंसा प्रथमोऽध्यायः ।

इति परमारवंशोद्भवमहाराजाधिराजश्रीमदिन्द्रदेवकृतौ सारसङ्ग्रहे
मूत्रपरीक्षा द्वितीयोऽध्यायः ।

इति ० मन्दरेभेन्द्रदेवकृतसारसङ्ग्रहे अशुभावर्त्ता नाम । ३ ।

„ शुभावर्त्ता नाम । ४ ।

„ मन्दग्रन्थी नाम । ५ ।

„ शुभाशुभो नाम । ६ ।

„ स्पर्शपरीक्षा नाम । ७ ।

„ गन्धपरीक्षा नाम । ८ ।

हस्तपरीक्षा नाम । ९ ।

आयुःपरीक्षा नाम । १० ।

व्याधिकाविधिर्नाम । ११ ।

शिरोवेदनाविधिः । १२ ।

श्लेष्मोपचारः । १३ ।

इति । १४ ।

पित्तोपचारः । १५ ।

अण्डवाही (?) उपचारः । १६ ।

मूत्रोपचारः । १७ ।

शोथोपचारः । १८ ।

कच्छूपचारः । १९ ।

इति । २० ।

रक्तोपचारः । २१ ।

इति । २२ । २३ । २४ ।

मूत्रविकारः । २५ ।

इति । २६ ।

चक्राकरी (?) उपचारः । २७ ।

(१५६८ ।) सुधातरङ्गिणीतन्त्रम् । (खण्डितागमम्) By ललितवल्लभभट्टाचार्य्य.
10×4 inches. Folia, 16. Lines, 8 on a page. Extent, 288 çlokas. Character, Nâgara. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

गणपतिमभिवन्द्य पार्व्वतीनन्दनैकं

मदजलबरधारागन्धलोलम्बगण्डम् ।

गर्जितसदियुधानां तागडवं पैयवरडं (?)

धवलधरणुवेशे यों हि नं संतद्दार ॥

कलन्धकर्णकुण्डलोल्लसत्कपोलशालिनीं

कलकूटपीनचारुचन्द्रखण्डमौलिधारिणीम् ।

प्रणम्य रम्यराम्यकाम्यसाधनाय चिन्मयीं

करोति शक्तिवल्लभो मुदा सुधातरङ्गिणीम् ॥

तन्त्राणां सम्मतिं ज्ञात्वा दैशिकानाञ्च सम्मतिम् ।

साधकानां हितार्थाय मन्त्रज्ञो विपुलीकृतः ॥

अथ पुरश्चरणपारम्भात् प्राक् तृतीयदिनकृत्यम् । इत्यादि ।

End. (खण्डितम् ।)

पुष्पिका । इति शक्तिवल्लभभट्टाचार्य्यविरचितायां सुधातरङ्गिण्यां पुरश्चरणपा-

रम्भदिनप्राक्तृतीयदिनकृत्यकथनं नाम प्रथमः कल्लोलः ।

अथ प्राक्-द्वितीयदिनकृत्यम् ।

(१२८६ ।) सूर्य्यार्णवः. 10×3 inches. Folia, 15. Lines, 8 on a page. Extent, 300 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Incorrect.

Beginning. ॐ श्रीगणेशाय नमः । राशिफलद्वादशमासाख्यम् ।

राजोवाच ।

सर्व्वशास्त्रं मया ज्ञातं त्वत्प्रसादाद्धि नारद ।

राशिभेदो मया प्राप्त मेषराशिफलाफलम् ॥ (?)

नारदोवाच । (?)

यत् त्वया पृष्टं राजन् राशिभेदो वदाम्यहम् । (?)

आदौ मेषगुणाः कथ्यास्तथापि च नृपोत्तम ॥ इत्यादि ।

End. धारितं व्रतमेकन्तु रविवारे वरेहिने ।
प्रत्यर्पिकं प्रकर्त्तव्यं पापनाशो भवेद् ध्रुवम् ॥
वद्रजन्मसुखी कृत्वा पुत्रपौत्राविवर्द्धनम् ।
एवं विधि न कर्त्तव्यं जन्म पुण्यकम् ॥ (?)

Colophon. इति श्रीसूर्य्यार्णवे नारदाम्बरीषसम्बादे कर्म्मविपाके मीनराशिफलं प्रायश्चित्त-द्वादशोऽध्यायः ॥ इति श्रीसूर्य्यार्णवे द्वादशराशिकर्म्मविपाक-सम्पूर्णं शुभम् ॥

विषयः । इति ० मेषराशिफलं प्रायश्चित्तं प्रथमोऽध्यायः ।

,,	वृषराशिफलं	,,	२ ।
,,	मिथुनराशिफलं	,,	३ ।
,,	कर्कटराशिफलं	,,	४ ।
,,	सिंहराशिफलं	,,	५ ।
,,	कन्याराशिफलं	,,	६ ।
,,	तुलाराशिफलं	,,	७ ।
,,	वृश्चिकराशिफलं	,,	८ ।
,,	धनूराशिफलं	,,	९ ।
,,	मकरराशिफलं	,,	१० ।
,,	कुम्भराशिफलं	,,	११ ।
,,	मीनराशिफलं	,,	१२ ।

(१०५३ ।) सौभाग्यतरङ्गिणी. By मुकुन्द. 16 x 4 inches. Folia, 30. Lines, 7 on a page. Extent, 980 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमः श्रीमहात्रिपुरसुन्दर्यै ।

प्रणम्य चिन्मयीं शक्तिं श्रीमत्-त्रिपुरसुन्दरीम् ।
तोषाय तनुते तस्याः श्रीसौभाग्यतरङ्गिणीम् ॥

इह खलु सर्व्वेषां जन्तूनां दुःखं मे भूयात् सुखं मे भाभूदिति दुःखो-पतिवशात् दुःखनिवृत्तये भवतः प्रायश्चित्तमुख्यनिवृत्तिसुखावाप्ती च

ब्रह्मज्ञानमन्तरेण न भवतः। . . . . । ब्रह्मज्ञानञ्च शक्तिभक्तिमन्तरेण न भवतीति श्रूयते पुराणेषु। तत्र मार्कण्डेयपुराणे;—

स्तुता संपूजिता पुष्पैर्धूपगन्धादिभिस्तथा।
ददाति वित्तं पुत्रांश्च मतिं धर्म्मे तथा शुभां॥

इत्यादि।

End. ततश्च निर्म्माल्यमाज्ञाय त्रिपुरचण्डिकायै नमः इत्यैशान्यां क्षिपेत्। ततो भगवतीप्रसादं तद्-भक्तेभ्यो दत्त्वा स्वयमपि प्राश्नीयात्। इति।

Colophon. इति श्रीमुकुन्दविरचितायां सौभाग्यतरङ्गिण्यां षष्ठी लहरी॥

(१४५२ I) सौभाग्यरत्नाकरः. By विद्यानन्दनाथ. 10×5 inches. Folia, 389. Lines, 9 on a page. Extent, 8,752 çlokas. Character, Nagara. Date, Samvat 1952. Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमो भगवत्यै।

प्रारम्भे भरणे भङ्गे यन्मदस्यन्दविह्वलः।
कारणानि प्रपञ्चस्य तं वन्दे वारणाननम्॥
सच्चिदानन्दनाथाङ्घ्रिसरोरुहयुगं भजे।
यत् कटाक्षक्षणोत्सम्पातात् शिवोऽहं पञ्चकृत्यकृत्॥
प्रकाशरूपा प्रथमे प्रयाणेऽमृतरूपिणी।
प्रतिप्रयाणे तामन्तः पश्यन्तीं चित्कलां भजे॥ (?)
आलोक्य सर्व्वतन्त्राणि यामलादीन्यशेषतः।
ज्ञात्वा गुरुमुखात् तेषां रहस्यार्थांश्च तत्त्वतः॥
सच्चिदानन्दनाथाङ्घ्रिसरोजद्वयषट्पदः।
श्रीविद्यानन्दनाथोऽहं वीतरागो विमत्सरः॥
विचरन् मेदिनीमेतां विद्वद्भिर्विमलात्मभिः।
प्रयागे प्रार्थितः प्रीत्यै तेषां लोकहिताय च॥
पञ्चस्रोत + योगाधस्तन्त्रमणिसंकुलम्। (?)
हंसयोगिनीचक्रप्रवालतिलकोज्ज्वलम्॥

निगमागमजलधिपूर्णेन्दुमोदकाकालविच्छिन्नितम् ।
नवचक्रमहाद्वीपं ब्रह्मकालनरूत्तमम् ॥
श्रीनाथपादुकापोतं चतुर्वर्गकलामृतम् ।
प्रकाशयामि सौभाग्यरत्नाकरमिति स्फुटम् ॥ इत्यादि ॥

End इत्यन्त्यवृत्तिविधिः ।
इति गदितमशेषं त्रैपुरं ब्रह्मविद्या-
पदमनपकृतानां क्षाब्दकृतं विधानम् ।
गुरुचरणसरोजाराधनालब्धमेतत्
पठतु परमगोप्यं वेदितं चिद्घनज्ञैः ॥
यथा पित्रोर्मुदे भूयाद्बालिशमपि भाषितम् ।
आम्बया सहतामेतत् तथापि भाषितं मम ॥
त्यक्त्वा कुलं कुलपथं पुरमध्यवीथ्या
गत्वा कुलं मधु निपीय यथेप्सितं या ।
मत्ता परं पुरुषमेत्य तदीयवक्त्रात्
सुप्ता पुनः स्वकुलमेति पुनातु सा माम् ॥

Colophon. इति-श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना ।
कृतसौभाग्यरत्नाब्धौ षट्त्रिंशो(शृ)त् तरङ्गकः ॥
इति श्रीमत्त्रिविक्रमनन्दनाथ-चरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीविद्यानन्द-
नाथेन कृते सौभाग्यरत्नाकरे षट्त्रिंशस्तरङ्गः । समाप्तम् ।
इति सम्वत् १६५२ सालमिति । आश्विन कृष्ण ८ रोज १ तद्दिने
सम्पूर्णम् । शुभम् ।

(४६१ ।) रसमुक्तावली. By गमभुर. 1 × 3 inches. Folia, 42. Lines, 7 on a page. Extent. 955 çlokas. Character, Bengali. Date, (?). Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमश्चण्ड्यै ।
गौरि हर्ष मिलु वेदनि रसकारं श्री वेदि को सदार्थ
वेदैवं भव तर्पि पिं इति न भवानी न गयी आनी ॥

भूयोऽगं यत्र कर्त्तरीमुखयुगालेखेन किं स्यादिति
कंरानन्दमुखी हसन् गिरिसुतां चुम्बन् मृड़ः पातु वः ॥
धीरस्तो गुणसिन्धुदुर्लभकरोद्गाढावगाढस्फुर-
ज्ज्योतिर्नाटककाव्यशास्त्रविलसत्सङ्गीतविद्याधरः ।
काव्याम्भोधिकलानिधिर्विमलनामसङ्गीतमुक्तावलीम्
सम्मोदाय शुभङ्करो वितनुते श्रीहस्तमुक्तावलीम्
सद्वर्णोज्ज्वलवर्णिनी गुणयुता पात्राणि चित्रायिता
नानाभावरसैर्युता रतिकरी श्रीमन्तनीराजना ।
उन्मीलन्मृदुचारुबन्धरचनालङ्कारसौलिम्पती
कण्ठाश्लेषमियं तनोतु सुधियां श्रीहस्तमुक्तावली ॥
यदि च वै सुचिराद्भिलिख्यते निविड़हस्तक एष कलारसः ।
ननु तदा रसिकाः शशिसन्निभामभिरमन्तु शुभङ्करभारतीम् ॥
अनुष्टुप्छन्दसां ग्रन्थः सन्धेयो दृढबोधकृत् ।
हस्तकस्यास्य विषयस्यानयोर्लक्षणस्य च ॥ -
हस्तकन्तु पताकादि विषयो भवनादिकम् ।
अनयोर्लक्षणं यत्तु वाच्यं चिह्नं तदेतयोः ॥ इत्यादि ।

End. यो यत्राभिनयो योग्यः सोऽनुक्तोऽपि नियुज्यते ।
नृत्ते कराणां मुद्राणां प्रयोगात् तत् फलं भवेत् ॥
उक्तं स्वयं ब्रह्मणैव लिखितं तन्निरूप्यते ।
नर्त्तकानां भवेद्धस्ते निर्मिता सततोज्ज्वला ॥
कीर्त्तिर्दिगन्तविश्रान्ता पुत्रपौत्रे – – – ।
सर्व्वलोकानुरागश्च नृपचित्ते सदा स्थितिः ॥

Colophon. इति शुभङ्करविरचिता हस्तमुक्तावली समाप्ता ।
समाप्तश्चायं ग्रन्थः ॥

विषयः । पताक, हंसास्य, कर्त्तरीमुख, प्रायोमुख, अलपद्मक, त्रिपताक, मुष्टिक, शिखर, अर्द्धचन्द्र, सर्पशिरा, सूच्यास्य, कटकामुख, अराल, शुकतुण्ड, संदंशका-कूर्म, ऊर्णनाभ, कपित्थ, हंसपक्ष, ताम्रचूड़, चतुर, मुकुल, भ्रमर, कश्म, कृष्णसार, घोलिक, सिंहास्य, मङ्गीमुख, गजदन्त,

कपोत, खलित, भ्रमर, पुष्पपुट, वैश्रवण, भ्रमर, संयोगवल्ली, पार्श्वमण्डली, अर्द्धमण्डली, परिवृत्त, पद्मकोश, प्रभृतिभिः प्रकारैर्नैनम्य प्रकारभेदकथनम् ॥

(१२८१।) वृत्तमुक्तावलीसारसमुद्धृतिका. By घनश्याम. 12 x 8 inches. Folia, 363. Lines, 6 on a page. Extent, 4,950 çlokas. Character, Newārī. Date, Newār Era, 795. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमस्तस्मै ।

यं देवं श्रुतिनाथिकाधिगहितं ब्रह्मादयो देवता
ध्यायन्ति प्रतिवासरं न च पुनः संयाति नेत्रातिथिम् ।
कैशोरं समुपास्य नन्दगृहिणीगेहेषु तिष्ठन् सदा
– – – नवनस्तुरीघरखयो मूर्च्छन् पतन् पातु वः ॥
सूर्यान्वये सूर्यइवाविरासीत् श्रीमान् जगज्ज्योतिरिति प्रसिद्धः ।
आस्तार्यसङ्गीतकलानिधयो भास्वान्सुधो श्रीरवनीकरश्च ॥
तस्यात्मजाभूत् किल पार्वतीव मानाय सविलक्षितिशीलसृष्टा ।
तासूयत श्रीमदनन्तनाम सर्वां यथाजायत वै जयन्तः ॥
सङ्गीतकाव्यानुतरागलोभी वैलीकलाकोशकचित्रसेनः ।
श्रीमाननन्तः सुतमोदनाय मुक्तावलीसारसमुद्धृतिम् ॥ (?)
श्रीमाननन्तस्य नियोगतोन मुक्तावलीसारसमुद्धृतिम् ।
ज्ञात्वा मतं श्रीभरतादिकानां शुभङ्करस्तापि करोमि यत्नात् ॥
विघ्नविघाताय मङ्गलं कुर्व्वन्नाह । श्रीदाय दर्पाय तनुवे नयं भूतो
वृत्तमुक्तावलीं विमलतालसङ्गीतमुक्तावलीं कथम्भूतः काव्यामोदि-
कलानिधिः पुनः कथम्भूतः शुभचिन्मुद्रुतरोद्धृताडावमाडम्बरबद्धोतिमोडकामप्राक्षविलक्षणसङ्गीतविद्याधरः पुनः कथम्भूतः श्रीरसः
मुद्रेगुरुतः । इत्यादि ॥

End. यः नरः प्रियोक्तं कुर्य्यात् यः वा प्रवीणेत पठति वा अपि वेदविद्वद्वर्य्य-
वैदिकानां यान्त्रिकाणां पण्यानां मानितः सम्भावितानां सुवर्णसिद्धानां
तां गतिं सङ्गतः प्राप्नुयात् ॥

phon. इति हस्तमुक्तावलीसारसमुद्धृतिकायां श्रीघनश्यामविरचितायां समाप्तोऽयं हस्तप्रकरणः ।

श्रीरस्तु । बाणानन्दपर्व्वंतवर्षे – – ॥ नेपाल सम्वत् ७९५ । – – ॥

ुषय. । हस्तमुक्तावल्या व्याख्यानम् ।

---

(३)१०९ ।) होरापद्धतिकल्पवल्ली (सटीका). By विट्ठल. 10×4 inches.
1. Lines, 18 on a page. Extent, 742 çlokas. Character, Nāgara.
?. Appearance, old. Prose and verse. Generally correct.

ning. गौरीश्च गौरीपतिमादरेण गौरीसुतश्च प्रणिधाय चित्ते ।
तोषाय होराविदुषां करोति श्रीविट्ठलः पद्धतिकल्पवल्लीम् ॥
नानायन्त्रैर्जन्मकालं विदित्वा तत्कालीनान् स्पष्टखेटांश्च कृत्वा ।
लग्नं कार्य्यं स्पष्टयेत्तत्र रीत्या तत्षड्युक्तं कामिनीमन्दिरं स्यात् ॥
इत्यादि ।

या: B. पद्मजकुलं विकसति..यदुपासनाद्व विदुषा ।
दिनकर..वन्देऽहं तं देवं तिमिरनाशकम् ॥
(स्पष्टं) विद्याकरसमूहेन सद्‌ज्योतिर्विदा विदा ।
पद्धतेः कल्पवल्लयाश्च प्रतानं क्रियते मृदु ॥
ग्रन्थादौ शिष्टाचारप्राप्तं विघ्नध्वंसफलकं मङ्गलमाचरति । गौरीमिति ॥ इत्यादि ।

कृष्णात्रिगोत्रे सुतरां पवित्रे पवित्रकर्म्मार्जनि..शर्म्मा ॥
तत्सूनुना विट्ठलदीक्षितेन चक्रे लघुः पद्धतिकल्पवल्लीम् ॥

E. शरीरभाजां प्राणिनां शुभाशुभं भाव्यमिति । श्रीनारायणाय नमः ॥
इति श्री । होरापथे होरिकपान्थवृन्दश्रमच्छिदे विट्ठलरोपितायाम् ।
मधुस्रवत्-पद्धतिकल्पवल्ल्यां कथाद्यमाद्यं कुसुमं समाप्तम् ॥

INDEX I.

TITLES OF MSS.

अ ।

आ।

इ।

उ।

ए।

क।

	नामानि ।	पत्राङ्कानि ।	विवृतानां विवरणपत्राङ्कानि च ।
४३ ।	कात्यायनश्राद्धविधिः (घ ।)	४५	
४४ ।	कातन्त्रविस्तरः	... ...	१५८
४५ ।	कादिमतम् (ख ।) ...	३८	
४६ ।	कामकला (च ।) ...	८२	
४७ ।	कामन्दकीयनीतिसारः ...	९१	
४८ ।	कारण्डव्यूहः (ख ।) ...	८९	
४९ ।	कार्त्तिकमाहात्म्यम् (ङ ।)	६, ३२	
५० ।	कालज्ञानम् (च ।) ...	८०	
५१ ।	कालभैरवस्तोत्रम् (क ।) ...	५२	
५२ ।	कालमाधवकारिकाव्याख्यानम्	... ...	१६०
५३ ।	कालिकाकुलसर्व्वस्वे कालिका-स्तोत्रम् । (ट ।) ...	५२	
५४ ।	कालीकुलार्णवतन्त्रम् ...	... ...	१६०
५५ ।	कालीतत्त्वम् (आचारप्रतिपादनतत्त्वम्)...	... ...	१६१
५६ ।	कालीतत्त्वम् (प्रायश्चित्तविधिः)	... ...	१६२
५७ ।	कालोत्तरम् (च ।) ...	८०	
५८ ।	कालोत्तरतन्त्रम् (च । क । क्ष । च ।)	६, ८, ९, ३०, ७३	९६
५९ ।	काव्यप्रकाशः (ञ ।) ...	६७	
६० ।	काव्यादर्शः (ख ।) ...	७४	
६१ ।	काशिकावृत्तिः	१६	
६२ ।	किरणावलीटीका (ठ ।) ...	५०	
६३ ।	किरातार्जुनीयकाव्यम् (ग)	१३	
६४ ।	कीचकवधकाव्यम् (ठ ।) ...	७५	
६५ ।	कीर्त्तिपताका (ञ ।) ...	३३	९७
६६ ।	कुब्जिकामतम् (घ । क । द ।)	३४, ५५, ५७ ...	९८, ९९
६७ ।	कुब्जिकामतोत्तरम् (ख ।) ...	७	
६८ ।	कुमारसम्भवम्	१२	

ज।

झ।

ट।

त।

नामानि।	पत्राङ्कानि। विषयाणां विवरणपत्राङ्कानि च।
२३६। प्रश्नोत्तरावली	२१०
२३७। प्रसन्नसाहित्यरत्नाकरः	२११
२३८। प्रस्तावरत्नाकरः	२१२
२३९। प्रह्लादचरितम् (ग।) ...	६२
२४०। प्रायश्चित्तशौचाचारविधिः	२१४
२४१। प्रायश्चित्तसमुच्चयः	२१५
२४२। प्रासाददीपिकामन्त्रटिप्पनम्	२१६
२४३। प्रेतमञ्जरी	२१८

ब।

२४४। बृहन्नारदीयपुराणम् (ख। क। घ।)	२४, २५, २८
२४५। बोधिचर्य्यावतारः (भ।) ...	२१
२४६। बोधिचर्य्यावतारटिप्पनी (ज।)	२१
२४७। बौद्धाधिकारव्याख्या (क।)	६१
२४८। ब्रह्मपुराणम् (ट। न।) ..	८३, ८५
२४९। ब्राह्मणार्थप्रकाशः	२१८

भ।

२५०। भक्तविजयकाव्यम्	२२६
२५१। भट्टोत्पलरत्नमालाटीका	२२९
२५२। भरतनामदीपकनाट्यशास्त्रम्	२३१
२५३। भगवद्गीता (क। ख। ख। ख। ज। ख।)	१९, ३८, ३९, ६१, ६२, ७५
२५४। भागवतम् (क। ग।) ...	१३, १९, २५, २८, ३२
१५५। भागवतटीका (ख।) ...	९१
१५६। भागवतदशमस्कन्धः (क।)	३४
२५७। भागवतदशमस्कन्धटीका ...	२८
२५८। भामावृत्तिः (ज। झ। ज।)	१४, ६७, ८१

--

ल।

व।

श।

--

ष ।

स ।

ह ।

INDEX No. II.

GENERAL INDEX.

अ।

आ।

इ।

ख।

ग।

नामानि ।   पत्राङ्कानि ।

ट ।

ड।

नामानि।   पद्याङ्कानि।

भ ।

म ।

ल ।

14803

व ।

श।

स ।

ह ।